2.५

॥ श्रीः ॥

जागदीशव्याप्तिपञ्चक—

गूढार्थतत्त्वालोकः

व्याप्तिपञ्चकविवृत्यपरनामधेयः

651

सर्वतन्त्रस्वतन्त्रमिथिलामण्डलमण्डनपण्डितकुलपति

झोपाख्यश्रीधर्मदत्त (बच्चाझा) सूरिविरचितः

651

ग्रन्थकर्त्तुस्तनुजन्मना—

तार्किक झोपाख्य श्रीजगदीशशर्म्मणा

काश्यां—

विद्याविलास यन्त्रालये मुद्रयित्वा प्रकाशितः।

शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृ०	पं०
द्धि	द्धि	४	१९
तित्य	त्य	४	२३
दा	पदा	५	४
वार	वा	६	१४
स्य	स्यच	७	२०
न	नंससर्गेण	८	१०
ष्त्रैका	ष्वैका	९	३
ष्टसत्	ष्टस्सन्	९	७
वह्निगतै	वह्नित्वगतै	१०	६
भप	भय	१२	२७
ज्मेन	गमेन	१४	३
स्वसामा	सामा	१४	२९
मस्थामस	वस्थामस	१५	२
निनेशे	निवेशे	१६	२९
शूयस्यतद	शूयस्यसाध्यतावच्छे-दकसम्बन्धत्वेकालिके-नसंयोगत्वस्यतद	१८	१३
भूम	धूम	२०	१५
गितात्वो	गित्वे	२०	१७
कालितकेन	कालिकेन	२५	१८
सामान्यीय	साध्यसामान्यीय	२६	२९

अशुद्धम्	शुद्धम्	पृ०	पं०
भाव	भावत्व	२७	८
कत्व	कत्वे	२८	११
अशुद्धम्	शुद्धम्	पृ	पं
घटत्वएव	घटएव	२९	४
साध्याभावाभावाव	साध्याभावत्वाव	२९	९
त्वादित्यादित्य	त्वादित्य	२९	२०
भावाद्य	भावत्वाद्य	३०	१०
स्वानि	स्त्वानि	३१	१९
नच्छिन्न	वच्छिन्न	३२	२
अधिकरणतानिष्ठाधिकरणता- निष्ठाधिकरण तानिरूपितानिरू	अधिकरणतानिष्ठा धिकरणतानिरू	३२	२९
ता	त्वा	३२	२९
त्रा	त्राति	३३	२५
त्वेपि	त्वेप्य	३८	३१
नच	नचा	३९	४

॥ श्रीः ॥

व्याप्तिपञ्चकविवृतिः ।

॥ श्रीगणेशाय नमः ॥

व्याजस्वीकृतसेवया विधुरभूदग्रेसरः श्रीमता-
म्मानव्याहतिकैतवावनमनादीशास्त्रिलोकीपतिः ।
सम्भिन्नाब्जकुलप्रसूतिविभवादम्भोजमब्जालयो
यस्य श्रीगिरिजापदाम्बुजयुगन्तत्स्यादभीष्टप्रदम् ॥ १ ॥
जगदीशकृतव्याप्तिग्रन्थव्याख्यावलम्बिनी ।
विवृतिर्धर्म्मदत्तेन मैथिलेन वितन्यते ॥ २ ॥

दीधितौ समारब्धेति समीचीनभूतकालिकारम्भविषयेत्यर्थः। आरम्भश्चाद्यकृतिः, प्रकृते कृतावाद्यत्वञ्च तत्कृतिसमवायिसमवेतप्रामाण्यपरीक्षागोचरकृतिक्षणध्वंसानधिकरणक्षणवृत्तित्वम्।समवेतान्तनिवेशादन्यपुरुषकृतपरीक्षायाः पूर्ववृत्तत्वेऽपि न क्षतिः। आरब्धत्वकथनेन प्रामाण्यपरीक्षाया वृत्तत्वनिरासेन तदुपयोगिव्याप्तिग्रहोपायप्रतिपादनादेर्वैफल्यशङ्का निरस्ता। समीचीनत्वञ्चेष्टसाधनत्वादिप्रमाजन्यत्वं तेन कृतेः संवादित्वलाभेन तद्विषयपरीक्षा तत्कारणव्याप्तिग्रहोपायप्रतिपादन तत्साधनव्याप्तिस्वरूपनिरूपणानां फलवत्वलाभेनोपादेयत्वव्यक्तिः। *अनुमानप्रामाण्यपरीक्षेति*। परमतनिराकरणपूर्वकस्वमतव्यवस्थापनम्परीक्षा । परमतं परकीयमतिविषयः अनुमानप्रामाण्याभावः तन्निराकरणं तज्ज्ञानेऽप्रामाण्यज्ञापनं यद्वा परमतं परमतिः सा च नानुमानं प्रमाणमित्याकारिका तन्निराकरणं तत्राप्रामाण्यज्ञापनं तच्चासिद्ध्याद्युद्भावनं तत्पूर्वकं तदुत्तरकालिकं स्वमतमनुमानप्रामाण्यं तद्व्यवस्थापनमप्रामाण्यज्ञानानास्कन्दिततद्गोचरज्ञानानुकूलव्यापारः। अनुमानाप्रामाण्यज्ञानेऽसत्यप्रामाण्यज्ञाने, अनुमानप्रामाण्यग्रहोत्पत्तेरसम्भवेन व्यापारस्य न ज्ञानजनकत्वसम्भव इति भवति तस्य परमतनिराकरणपूर्वकत्वम्, अनुमानप्रामाण्यप्र-

तिपादकग्रन्थस्य परीक्षात्वोक्त्या केवलस्वमतप्रतिपादकत्वनिराकरणादशेषजिज्ञास्वध्ययनयोग्यतालाभेन व्याप्तिस्वरूपनिरूपणस्यापि तल्लाभः ॥ *कारणीभूतेति* ॥ यत्रानवस्थादुस्थतर्क्कानिवर्त्यव्यभिचारशङ्कावरुद्धोत्पत्तिकव्याप्तिग्रहासत्वनिबन्धनानुमितिरूपफलानुत्पत्त्याऽप्रामाण्यमनुमानस्य मन्यन्ते परे चार्वाकादयस्तत्र नानाभिधाय व्याप्तिग्रहोपायं प्रामाण्यमनुमानस्य व्यवस्थापयितुं शक्यमिति व्याप्तिग्रहोपायप्रतिपादनस्य भवति परीक्षाकारणत्वमिति भावः । व्याप्तिस्वरूपनिरूपणस्य परीक्षाकारणत्वेऽपि व्याप्तिग्रहोपायप्रतिपादनस्यापि तादृशतया व्याप्तिग्रहोपायश्च वक्ष्यत इत्यनेन तत्प्रतीक्षाविधानमनुचितमित्याशङ्कानिरासाय व्याप्तिस्वरूपमविद्वांसंप्रति व्याप्तिग्रहोपायप्रतिपादनस्याशक्यतया तत्प्रथमं स्वरूपाभिधानवीजभूतन्तदुपजीव्यत्वं दर्शयितुं परीक्षाकारणव्याप्तिग्रहोपायकारणत्वेन स्वरूपनिरूपणं दर्शितं प्रतिपादननिदानमित्यनेन । यद्यप्युक्तशङ्कानिवृत्तिः कारणान्तावचनेपि भवत्येव तथाप्यनुमानप्रामाण्यनिरूपणानिरूपितोपोद्घातसङ्गतिलाभाय तदुक्तिः । व्याप्तिस्वरूपगोचरपूर्वपक्षस्यैव प्रथममभिहितत्वेन व्याप्तिस्वरूपनिरूपणस्याक्रियमाणत्वेऽपि तदनुकूलगोचरकृतेर्विद्यमानतयाऽऽरभ्यमाणत्वन्तत्रास्त्येवेति कुरुत इत्यनुक्त्वारभत इत्युक्तमिति । नन्वित्यादिनेतिमूले *नन्वित्यादि* नन्विति प्रश्नः, अनुमितेरितरभेदानुमितेः, कारणं यद्व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानजन्यज्ञानत्वरूपहेतुस्तद्घटकव्याप्तिज्ञानस्य विषयकेत्यर्थः । यद्वा अनुमितिकारणपरामर्शविषयव्याप्तिःकेत्यर्थः । एतेन घटकत्वार्थकसप्तम्या समासस्य क्वाचित्कत्वेऽपि कर्मधारयेणार्थलाभे गुरुतरसमासान्तराश्रयणस्यायुक्तत्वेऽपि च न क्षतिः, उक्तार्थस्य कर्मधारयलभ्यत्वात् । अत्र का व्याप्तिरित्यभिधानेऽनुमानप्रामाण्योपपादकत्वलक्षणोपोद्घातसङ्गत्यलाभाज्ज्ञान इत्यन्तमनुमित्युपपादिका व्याप्तिः केत्याभिधाने कथमनुमित्युपपादिकेत्याकाङ्क्षानिवर्तकस्य वक्तव्यतापत्त्यानुमितिहेतुव्याप्तिज्ञान इति । नचैवमनुमितिहेतुज्ञान इत्येववक्तव्यमनर्था पुनरुक्तिरिति वाच्यम् । अनुमित्यनुपपादकस्याप्यनुमितिहेतुसमूहालम्बनज्ञानविषयत्वसम्भवेनानुमित्युपपादकत्वाप्राप्तेः तदुक्तौ च व्याप्तिविशिष्टज्ञानेऽनुमितिजनकत्वान्वये विशेष्यतावच्छेदके सति बाधके विशेषणप्रयोजकत्वनियमेनोक्तावच्छेदकत्वात्मकप्रयोज-

कत्वस्य लाभेन जनकतावच्छेदके तत्र सर्वजनसिद्धप्रयोजकत्वस्य लाभसम्भवादिति । *व्याप्तिः* । व्याप्तिपदार्थः, तेन व्याप्तेरनुमितिजनकतावच्छेदकरूपत्वेपि ज्ञान इत्यन्तस्य न वैयर्थ्यम्, सप्तम्या विषयत्वमर्थः, किमो जिज्ञासा, साच व्याप्तिपदार्थतावच्छेदकावच्छिन्नज्ञानं जायतामित्याकारिका ॥ *नतावदव्यभिचरितत्वमिति* व्याप्तिरित्यनुषञ्जनीयम् । अनुमितिजनकतावच्छेदकमिति तदर्थः, अव्यभिचरितत्वमव्यभिचरितत्वपदार्थः । तेन साध्याभाववदवृत्तित्वादिसाधारणस्याव्यभिचरितत्वत्वस्यैकस्याभावेपि न क्षतिः । अथात्राव्यभिचारपदार्थो नानुमितिजनकतावच्छेदकः साध्याभाववदवृत्तित्वादिभेदवत्त्वादिति प्रयोगः, तन्न सम्भवति प्रत्येकभेदस्य हेतुत्वेऽवच्छेदकावच्छेदेन साध्यत्वे भागासिद्धिः । सामानाधिकरण्येन साध्यत्वेऽव्यभिचरितत्वपदार्थमात्रेऽभिमतस्य व्याप्तित्वाभावस्यासिद्धेः, साध्यवद्भिन्नावृत्तित्वाद्यंशे जायमानव्यभिचारशङ्काया अनिवृत्तेश्च, मिलितस्य हेतुत्वे स्वरूपासिद्धेरिति चेन्न । अनुमितिजनकत्वं पक्षीकृत्य साध्याभाववदवृत्तित्वादिविषयत्वावच्छिन्नत्वाभावकूटहेतुनाऽव्यभिचारपदार्थविषयकत्वानवच्छिन्नत्वस्यैव साध्यत्वात् । नचानुमितिजनकतात्वावच्छेदेन साध्यता सामानाधिकरण्येन वा । नाद्यः । वह्न्यभाववदवृत्तिधूमादिहेतुकस्थले परामर्शनिष्ठहेतुत्वस्य साध्याभाववदवृत्तित्वविषयत्वावच्छिन्नत्वेन बाधभागासिद्ध्योः प्रसङ्गात् । न द्वितीयः । विवक्षितार्थासिद्धेः सर्वतज्जनकतास्वेव तस्य साधनीयत्वादिति वाच्यं प्रकृतपक्षतावच्छेदकतापर्य्याप्त्यधिकरणधर्मपर्य्याप्तावच्छेदकताकविशेष्यतानिरूपितविषयत्वाभिन्नप्रकृतहेतुतावच्छेदकपर्य्याप्तावच्छेदकताकविशेष्यतानिरूपिताव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणावच्छेदकताकविषयत्वानवच्छिन्नत्वस्य साध्यत्वात्तादृशहेतुविषयत्वनिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नविषयत्वावच्छिन्नत्वाभावकूटस्य हेतुत्वाच्च पक्षतावच्छेदकतापर्याप्तिनिवेशाच्च वह्न्यभाववदवृत्तिधूमवत्पर्वतपक्षकवह्निसाध्यकधूमहेतुकानुमितिजनकत्वेन भागासिद्धिः । अनुमितिजनकता च प्रकृतहेतुतावच्छेदकावच्छिन्नलिङ्गकप्रकृतसाध्यतावच्छेदकावच्छिन्नविधेयकप्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकानुमितिजनकतारूपा ग्राह्या । नातः प्रागुक्तानुमितिजनकतायां केवलपर्वतत्वादिरूपपक्षतावच्छेद-

कमादाय भागासिद्धितादवस्थ्यम्। नचैवमपि धूमव्यापकवह्निसामाना- धिकरण्यवह्न्यभाववदवृत्तित्वोभयवद्धूमवान्पर्वत इति ज्ञानीयतादृश- सामानाधिकरण्यत्वावच्छिन्नसाध्याभाववदवृत्तित्वत्वावच्छिन्नविषय- ताया जनकतावच्छेदकत्वेन भागासिद्धितादवस्थ्यं साध्याभाववद- वृत्तित्वत्वातिरिक्तधर्मानवच्छिन्नविषयत्वानवच्छिन्नत्वन्तूभयवत्ताज्ञा- नीयतद्धर्मावच्छिन्नविषयताया जनकतानवच्छेदकत्वासिद्ध्या विव- क्षितुमशक्यमितिवाच्यम्। प्रागुक्तविषयतात्वावच्छिन्नावच्छेदकतानि- रूपि तत्वाभावस्यैव हेतुसाध्यविधयाप्रवेशात्। उक्तज्ञानीयविषयताया अपितादृशसामानाधिकरण्यत्वावच्छिन्नविषयतात्वेनैवावच्छेदकत्वात्। अथ परमते वह्निव्याप्यो धूमो धूमवान् पर्वत इतिज्ञानस्यापि कारणत्वेन विशिष्टविषयतायाः कारणतानवच्छेदकतया साध्याभाववदवृत्तित्व- विषयताया जनकतावच्छेदकत्वेपि साध्यसिद्धिरिति न विवक्षितार्थ- सिद्धिरिति चेन्नैवम्। प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यत्वनिष्ठाव- च्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारत्वनिष्ठावच्छेदक- ताविशिष्टहेतुतावच्छेदकावच्छिन्नविशेष्यत्वनिष्ठावच्छेदकतानिरूपिता- व्यभिचारपदार्थतावच्छेदकावच्छिन्नविषयतात्वावच्छिन्नावच्छेदकता- निरूपितत्वाभावस्यैव साध्यत्वात् स्वनिरूपकजनकतानिरूपितत्वस- म्बन्धेन वैशिष्ट्यं बोध्यम्। एवञ्च परमते निश्चयविशिष्टनिश्चयत्वेन ज- नकत्वेपि परामर्शस्य न दोषः। एवं सति तद्भिन्नेत्यादिहेतुवाक्यस्यापि साध्याभाववदवृत्तित्वत्वावच्छिन्नविषयतानवच्छिन्नानुमितिजनकते- त्यत्रैवतात्पर्ये व्याप्तिपदानुषङ्गं विनोक्तवाक्यस्य बाधितार्थकत्वेन व्याप्तिपदानुषङ्गेण तदनुमितिजनकतावच्छेदकत्वेनाभिमताव्यभिचरि- तत्वं, साध्याभाववदवृत्तित्वादिरूपा न व्याप्तिरितित्यर्थकरणे साध्या- भाववदवृत्तित्वस्यानुमितिजनकतावच्छेदकत्वव्यतिरेकप्रतीतेः। *केव- लान्वयिन्यभावादिति*। केवलान्वयित्वग्रहेऽनुमितिजनकज्ञाने विषयि- तायाः परस्परोपश्लिष्टसाध्याभाववदवृत्तित्वनिरूपिताया अभावात्प्र तिबन्धकसत्वादित्यर्थः। तथाच तदानीमनुमित्युपपादकव्याप्तिज्ञान- स्यैव सर्वत्र हेतुत्वसम्भवेन साध्याभाववदवृत्तित्वादिज्ञानस्यानुमिति- जनकतायां मानाभाव इति भावः। ईदृशव्याख्यानक्लेशश्च प्रश्नवाक्यो- द्देश्यस्योत्तरवाक्ये विधेयत्वनियमावष्टम्भेन तदनङ्गीकारे व्याप्तिरनुमि- तिजनकतावच्छेदको नाव्यभिचरितत्वपदार्थः, साध्याभाववदवृत्ति-

त्वादिभेदकूटत्वव्यादिरित्यर्थे बाधासिद्ध्याद्यभावात्, वस्तुतः पक्षतावच्छेदकस्य हेतुव्यापकसाध्यसामानाधिकरण्य एव सत्वात्, तन्मात्रस्य तत्त्वेनानिश्चयाच्च न सिद्धसाधनम्, अत्रापि पक्षे तद्धीत्यादेर्व्याप्तिदानुषङ्गेण तत्साध्याभाववदवृत्तित्वन्न व्याप्तिरित्यर्थ एव ज्यायान्। तदा सम्बन्धात्साध्याभाववदवृत्तित्वादेरव्यभिचरितत्वविशेषत्वलाभेन प्रकृतानुमानस्य विशेषाभावकूटहेतुकसामान्याभावसाध्यकत्वप्राप्त्याऽप्रयोजकत्वव्युदासात्, अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वादिस्वरूपमित्यर्थस्त्वव्यभिचरितत्वमित्यनन्तरमनुमितिजनकतावच्छेदकत्वेनाभिमतमित्यस्य पूरणेन क्लेशेन समर्थनीयः। अन्यथा अव्यभिचरितत्वे साध्याभाववदवृत्तित्वादिरूपतायाः सिद्धान्तेपि सत्त्वेन तद्भिन्नत्वस्य प्रतिपत्यसम्भवेनासङ्गत्यापत्तेः, पूरणेतु केवलान्वयिन्यभावात्साध्याभाववदवृत्तित्वादेरनुमितिजनकतानवच्छेदकतया तादृशस्य तस्य भेदोऽनुमितिजनकतावच्छेदकत्वेनाभिमते सुग्रहः। तथाचाव्यभिचरितत्वस्य साध्याभाववदवृत्तित्वाद्यतिरिक्तविधाया अभावेन तेषां भेदस्यानुमितिजनकतावच्छेदके पर्यवसितत्वेऽव्यभिचरितत्वभेदः सिद्ध्यतीतिभावः। केवलान्वयिन्यभावादितितूक्तार्थकमेव। तेन न साध्याभाववदवृत्तित्वसिद्ध्यासिद्धिभ्यांव्याघात इति दिक् ॥०॥

साध्याभाववदवृत्तित्वमिति। अत्र वृत्तस्याभावोऽवृत्तं साध्याभाववतोऽवृत्तं साध्याभाववदवृत्तं तदस्यास्तीति साध्याभाववदवृत्ति तस्य भावः साध्याभाववदवृत्तित्वमिति। वृत्तं वृत्ति वृत्तेरभावोऽवृत्ति साध्यभाववतोऽवृत्ति यत्र स साध्याभाववदवृत्तिस्तस्य भावस्तत्वमिति वा विग्रहं वर्णयन्ति केचित्तन्नचारु न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर इत्यनुशासनविरोधात्। तदर्थश्च बहुव्रीहीतरसमासान्मत्वर्थीयो न भवति बहुव्रीहिसमासेन मत्वर्थीयार्थलाभे अगुणवत्त्वमित्यत्र गुणस्याभावोऽगुणन्तदस्यास्तीत्यगुणवानिति विग्रहनिराकरणेन न गुणवानगुणवानिति विग्रहस्य गुणप्रकाशरहस्यादौ दर्शनेन कर्मधारयपदस्य बहुव्रीहीतरपरत्वात् नच बहुव्रीहीतरत्वं समासत्वञ्च व्यर्थं बहुव्रीहेरन्यपदार्थप्रधानतया तदुत्तरमत्वर्थीयार्थस्य तावत्पदबहुव्रीहिणा बोधयितुमशक्यत्वात्। कृदन्ततद्धितान्तादिपदोत्तरमत्वर्थीयार्थस्य तादृशपदबहुव्रीहिसमासस्यैवासम्भवेन बोधयितुमशक्यत्वाच्चेति वाच्यम्। उद्देश्यांशे उपरञ्जकः

स्यापि विशेषणत्वेन स्वरूपबोधनार्थत्वात् । नच न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तत्रसम्भवतीत्येव वाच्यमिति वाच्यम् । राजपुरुषवानित्यत्र राजापुरुषोयत्रेतिबहुव्रीहेस्सम्भवात् नचैवमपि यत्रराजाराजसम्बन्धी पुरुषश्चास्ति तत्रमतुब्बोध्यस्य देशविशेषस्य बहुव्रीहेः प्रतिपत्तिसम्भवेनानुपपत्तितादवस्थ्यमिति वाच्यम् । यत्पदेन यादृशधर्मावच्छिन्नविषयताको बोधो मत्वर्थीयसमभिव्याहृतेन जायते मतुपः समभिव्याहारं विना तेन पदेन बहुव्रीहिणा तादृशधर्मावच्छिन्नविषयताकबोधसम्भवे तत्पदान्मत्वर्थीयो न भवतीत्यर्थस्य विवक्षितत्वात् । तथाच राजसम्बन्धिपुरुष सम्बन्धित्वावच्छिन्नविषयताकोबोधो मतुप्समभिव्याहृतेन राजपुरुषपदेन जायते बहुव्रीहिसमासेन तु राजाभिन्नपुरुषसम्बन्धित्वेनैवेति न दोषः । एवञ्चारूढवानरवानिति जरच्चित्रगुमानिति चारुढवानरसम्बन्धित्वेन जरदभिन्नचित्रगोसम्बन्धिपुरुषसम्बन्धित्वेन बोधतात्पर्येण साधुरेव । बहुव्रीहिणा स्वकर्मकारोहणकर्तृवारनरसम्बन्धिसम्बन्धित्वेन जरदाभिन्नाचित्रगोसम्बन्धिनः सम्बन्धित्वेन च मत्वर्थीयार्थस्याप्रत्ययादिति । अथाऽसुव्वत इति भाष्यप्रयोगदर्शनाद्रक्तदण्डवानित्यादिलौकिकप्रयोगदर्शनादुक्तव्युत्पत्तेः प्रायिकत्वेनात्रापि तत्क्षतेरनतिदोषत्वमिति चेदेवमप्यवृत्तमित्यस्यावृत्तीत्यस्य च पूर्वपदार्थप्रधानाव्ययीभावसमासत्वेन पूर्वपदार्थप्रधानसमासघटकोत्तरपदार्थेन समं समासाघटकपदस्यानन्वितत्वनियमेन वृत्तित्वे साध्याभाववतोन्वयस्यासम्भवो दोषः । नचोक्तनियमे किम्मानं भूतलस्याघटमित्यत्र घटे भूतलानन्वयः । एवं साध्याभाववदवृत्तमितिवदभ्युपगममात्रेण भूतलोपघटमित्यस्य सत्त्वेपि घटे भूतलस्यानन्वयः, अव्ययीभावसमासस्याव्ययत्वेपि शोभनोपकुम्भमित्यादेः प्रामाणिकत्वेऽव्ययीभावात्मकाव्ययातिरिक्ताव्ययेनैवाव्ययिभावस्य समस्यमानत्वेन परिगणिताव्ययातिरिक्तस्याप्यव्ययीभावस्य समाससामान्यशास्त्रेण समस्यमानत्वस्य चाभ्युपगमनीयतया वास्तविके वा भूतलोपकुम्भमित्यादौ भूतलानन्वयः । शोभनोपकुम्भमित्यस्याप्रामाणिकत्वे उक्ताभ्युपगमे प्रयोजनविरहेण साध्याभाववतो वृत्तेरनन्वयापेक्षयाऽवृत्तमित्यव्ययीभावेन साध्याभाववतः समासत्वासम्भवनिबन्धनतादृशपदासाधुत्वरूपो बलीयानपिदोषः तादृशव्याख्याने वेदितव्य इति । तस्मात् साध्या-

भाववतो न वृत्तिर्विद्यते यत्र तत्साध्याभाववदवृत्ति तस्य भावस्तत्त्वमित्येव विग्रहं स्वीकुर्वन्त्यभियुक्ताः । व्यधिकरणबहुव्रीहिश्चायं हेतुः साध्याभाववदवृत्तिरित्यादेस्साध्याभाववदवृत्तपदोत्तरेणप्रत्ययादिना निर्वाहासम्भवेन स्वीकरणीयः । एवं व्यधिकरणबहुव्रीहेरुदाहरणान्तरस्य सत्त्वेऽपि तद्दर्शनात्र व्यधिकरणबहुव्रीहिस्वीकारासम्भवात्तस्यासार्वत्रिकत्वादुक्तप्रयोग एवोदाहरणतया वक्तव्य इति दिक् ॥ ० ॥

जागदीश्यामिदञ्चेति अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्ति दानञ्चेत्यर्थः । साध्यतावच्छेदकावच्छिन्नाभावप्रवेशेपि संयोगसम्बन्धावच्छिन्नघटाभावस्य समवायावच्छिन्नवह्न्यभावस्य च तादृशतया तमादाय व्याप्यवृत्तिसाध्यकेऽव्याप्तिःस्यादतो धर्मविधया यः साध्यतावच्छेदको धर्मविधया तदवच्छिन्नत्वस्य संसर्गविधया यः साध्यतावच्छेकः संसर्गविधया तदवच्छिन्नत्वस्य प्रतियोगितायां प्रवेशसूचनायाह "येनरूपेण येन सम्बन्धेनेति" । अथ साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वे सति साध्यतावच्छेदकीभूतसम्बन्धावच्छिन्नत्वप्रवेशेऽपि घटाभावादिवारणसम्भवाद्धर्मसंसर्गविधया तदवच्छेदकत्वप्रवेशो व्यर्थ इति चेन्न तत्समवायिनः संयोगेन साध्यतायां तत्समवायिनः समवायेनाभावीयप्रतियोगिताया वारणाय साध्यतानिरूपितसंसर्गतावन्निष्ठावच्छेदकताकत्वस्य तत्संयोगिनः संयोगेनाभावप्रतियोगिताया वारणाय साध्यतानिरूपितकिञ्चित्सम्बन्धावच्छिन्नावच्छेदकतावन्निष्ठावच्छेदकत्वस्य प्रवेशनीयत्वात्, संयोगिनः समवायेनाभावीयप्रतियोगितावारणाय च प्रतियोगितावच्छेदकताया अपि धर्मसंसर्गविधयाप्रवेशनीयत्वात् । वस्तुतः साध्यतावच्छेदकधर्मावच्छिन्नत्वस्य साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नत्वरूपस्यैव वाच्यतया तत्र साध्यतानिरूपितधर्मविधयावच्छेदकतावदितरनिष्ठावच्छेदकत्वानिरूपितत्वमात्रप्रवेशे तादृशातिरिक्तसंसर्गमादायासंभवस्स्यादिति धर्म्मविधयावच्छेदकत्वानिरूपितत्वं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्यापि साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वरूपस्यैव वाच्यतया तादृशसंसर्गातिरिक्तनिष्ठावच्छेदकत्वानिरूपितत्वमात्रप्रवेशे तादृशसंसर्गातिरिक्तधर्म्ममादायासम्भवस्स्यादिति संसर्गविधयावच्छेदकत्वानिरूपितत्वं च प्रवेशनीयम् । एतेन संयोगिनस्समवायेनाभाववारणाय धर्म्म

विधया संसर्गविधया वाऽवच्छेदकत्वस्य निरूपितत्वम्प्रवेश्यं नतूभयमि-ति शङ्का निरस्ता। अथ साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिता-रूपपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्ति प्रतियोगित्वस्य वक्ष्यमाणरी-त्यावश्यविवक्षणीयतया तत्र धर्मविधया संसर्गविधयावच्छेदकत्वत्वे-नावच्छेदकत्वस्यानन्तर्भावेणैकविधानिवेशेनैवपूर्व्वोक्तनिखिलाभाववार-णसंभवः संयोगिनस्समवायेनाभावीयप्रतियोगितायामपि साक्षात्प-रम्परासाधारणसाध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छे-दकस्वरूपसमवायसंयोगगतरूपवृत्तित्वस्य विरहात्। प्रतियोगितायां समवायस्य संसर्गविधया अवच्छेदकत्वेन स्वरूपस्य तदनवच्छेद-कत्वादिति चेन् मैवम् समवायिनस्संयोगाश्रयत्वेन साध्यतायां संयो-गाश्रयस्य समवायेनाभावमादायाव्याप्तेर्दुरुद्धरत्वात् इति ॥ ० ॥

अन्यथा तु व्याप्यवृत्तिसाध्यकेत्यादि। ननु साध्यतावच्छेदकाव-च्छिन्नत्वस्य प्रवेशोऽपि महानसीयवह्न्यभावस्य न वारणसम्भवः न च साध्यतानिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वं वाच्यम् वैशिष्ट्यञ्च स्वसामानाधिकरण्य स्वावच्छेदकसम्बन्धाव-च्छिन्नत्व स्वानवच्छेदकानवच्छिन्नत्व स्ववृत्तित्वै तच्चतुष्टयसम्बन्धेन। स्वसामानाधिकरण्यनिवेशाद्वह्निमान्धूमादित्यत्र निरवच्छिन्नघटत्वनि-ष्ठावच्छेदकताकप्रतियोगिताकाभावमादाय न दोषः स्वावच्छेदक-सम्बन्धावच्छिन्नत्वनिवेशात् घटानुयोगिककालिकेन वह्नित्ववदभा-वमादाय वह्नित्वाश्रयवान्धूमादित्यत्र नाव्याप्तिः, स्वानवच्छेदकानव-च्छिन्नत्वनिवेशान्महानसीयवह्निवृत्तित्वविशिष्टजात्यवच्छिन्नाभावमा-दाय न लक्षणासम्भवः स्ववृत्तित्वनिवेशाद्रूपत्वन्यूनवृत्तिजाति-मद्वान्रूपादित्यत्र निरवच्छिन्ननीलत्वादिनिष्ठावच्छेदकताकप्रतियो-गिताकाभावमादाय न व्याप्यत्वानिर्व्वाहः एतेन साध्यतावच्छेदकाति-रिक्तधर्म्मानवच्छिन्नत्वस्य विवक्षणे प्रमेयवतस्समवायेन साध्यतायां सत्वे हेतौ साध्यतावच्छेदकातिरिक्ताप्रसिद्धिनिबन्धनो दोषो नि-रस्तः साध्यतावच्छेदकताविशिष्टान्यघटत्वादिनिष्ठावछेदकत्वस्य प्रसिद्धत्वादितिवाच्यम् यत्र प्रतियोगिनिष्ठनानाविशेष्यतानिरूपिता परंपराऽनिरूपिता वा अवच्छेदकप्रकारता तत्रैवावच्छेदकतायाभिन्न-त्वेन महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकताया ऐक्येन तत्र विशिष्टान्यत्वविरहादव्याप्तितादवस्थ्यात् नच स्वानवच्छेदकस-

हानसीयत्वत्वावच्छिन्नत्वसत्त्वेन विशिष्टान्यत्वसम्भव इति वाच्यं-
तार्णवह्न्यभावमादायाव्याप्तेः यदि चैकसम्बन्धेनैकप्रकारेण भासमा-
नधर्म्मस्यैकावच्छेदकत्वमन्यथैकावच्छेदकत्वे निरवच्छिन्नत्वसावच्छिन्न
त्वयोर्विरुद्धयोस्सम्बन्धद्वयावच्छिन्नत्वस्य चापत्तेः नच तत्तद्धर्म्मवृत्ति-
त्वावच्छेदेनोभयोः स्वीकारे क्षत्यभावः प्रतिबध्यप्रतिबन्धकभावगुरुत्वा-
पत्तेः तथा हि समवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन
वह्नित्वविशिष्टवत्ताबुद्धौ समवायेन वह्नित्वविशिष्टं सत्कालिकेन महा-
नसीयत्वविशिष्टो नास्तीति बुद्धेः प्रतिबन्धकत्वापत्तिः समवायसम्ब-
न्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकतानिरूपिता सती कालिक-
सम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावावगा-
हिनिश्चयत्वस्य प्रतिबन्धकतावच्छेदकस्य तद्बुद्धावपि सत्त्वादतो
महानसीयत्ववृत्तित्वावच्छेद्यसमवायसम्बन्धावच्छिन्नत्ववदवच्छेदक-
तानिरूपितासती वह्नित्ववृत्तित्वावच्छेद्यकालिकसम्बन्धावच्छिन्नत्व-
वदवच्छेदकताकप्रतियोगिताकाभावावगाहिनिश्चयत्वेन प्रतिबन्ध-
कत्वम्वाच्यमिति गौरवम् अथ समवायसम्बन्धावच्छिन्नमहानसीयत्व-
प्रकारतानिरूपितकालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतानि-
रूपितविशेष्यत्वावच्छेद्यप्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतानिरूपि-
ताभावत्वावच्छेद्यविशेष्यत्वावच्छिन्नप्रकारताशालिनिश्चयत्वेनप्रतिब-
न्धकताया वाच्यत्वान्नदोष इति चेन्न तथाविधाभाववत्ताबुद्धौ विशे-
ष्येविशेषणन्तत्रापि विशेषणान्तरमितिरीत्या जायमानायाः स-
मवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टवत्ता-
बुद्धेः प्रतिबन्धकतापत्तिवारणाय तत्तसम्बन्धावच्छिन्नतद्धर्म्मनिष्ठा-
वच्छेदकताकप्रकारताशालिनिश्चयत्वेन प्रतिबन्धकत्वं वाच्यं तथा-
सत्युपलक्षणस्य प्रकारतावच्छेदकत्वे मानाभावेन नापत्तिः तत्रैका-
वच्छेदकत्वंस्वीकारे कालिकेनमहानसीयत्वविशिष्टत्वे सति समवा-
येनवह्नित्वविशिष्टवैशिष्ट्यावगाहिबुद्धेः प्रतिबन्धकत्वापत्तेर्वारणायत-
त्तद्वृत्तित्वावच्छेद्यसम्बन्धावच्छिन्नत्वस्यनिवेशनीयतया गौरवतादव-
स्थ्यात् नच प्रकारतावच्छेदकत्वस्य नैकत्वंस्वीक्रियतइतिवाच्यंप्रतियो-
गितावच्छेदकत्वेऽपितदापत्तेरिति विभाव्यते तदापि महानसीयवह्नि-
मान्तज्ज्ञानत्वादित्यत्र वह्न्यभावमादायाव्याप्त्यापत्तेरितिचेदत्रकेचित्
साध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वमे

व साध्यतावच्छेदकावच्छिन्नत्वपदेनाविवक्षणीयं वृत्तित्वं च स्वावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तथाच महानसीयत्ववह्नित्वयोरेका व्यासज्यवृत्त्यवच्छेदकता भिन्ना वास्तु प्रतियोगितावच्छेदकतात्वेनोभयथैव तस्या व्यासज्यवृत्तितया तत्प्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वस्य द्वित्व एव सत्त्वेन तेन सम्बन्धेन तत्प्रतियोगिताया वह्निगतैकत्वेऽवृत्तित्वविरहेण महानसीयवह्न्यभावस्य महानसीयत्ववह्नित्वगतद्वित्वे वह्न्यभावप्रतियोगिताया वृत्तित्वविरहेण तदभावस्य च लक्षणाघटकत्वान्नाव्याप्तिसम्भवः। तादृशावच्छेदकतात्वावच्छिन्नत्वञ्च निरूपितत्वसम्बन्धावच्छिन्नसाध्यत्वादिनिष्ठावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वं तेन महानसीयवह्नित्वावच्छिन्नसाध्यतानिरूपितवह्निवृत्त्यवच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वे वह्न्यभावप्रतियोगित्वस्य वह्नित्वावच्छिन्नसाध्यतावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वे स्वानिरूपितवह्नित्वनिष्ठावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन महानसीयवह्न्यभावप्रतियोगित्वस्य च वृत्तित्वेऽपि न क्षतिः यदि चैकत्ववह्नित्वं महानसीयवह्नित्वावच्छिन्नस्य प्रतियोगित्वस्य साध्यत्वस्य वावच्छेदकमिति प्रतीतिविरहेण महानसीयवह्नित्वावच्छिन्नप्रतियोगित्वाद्यवच्छेदकतात्वेन तत्पर्य्याप्त्यनुयोगितावच्छेदकत्वं वह्नित्वगतैकत्वे मास्तु परन्त्वेकत्ववह्नित्वमवच्छेदकमितिप्रतीतेः प्रामाणिकत्वेऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताया यथाविवक्षितानिरूपितत्ववत्यानिरूपिकीभूतस्य पर्य्याप्त्यनुयोगित्वस्य वह्नित्वगतैकत्वेऽवच्छेदकत्वस्य सत्त्वादव्याप्तितादवस्थ्यमिति विभाव्यते तदा साध्यत्वादिनिष्ठावच्छेदकतानिरूपितत्वमप्युपादेयम्। अथ वह्नित्वावच्छिन्नसाध्यतावच्छेदकताया ऐक्येन तन्निष्ठप्रतियोगितावच्छेदकत्वस्य लाघवेन तद्व्यक्तित्वस्यैव कल्पनीयतया साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिरिति चेन्न एतल्लक्षणकर्तृमते गुरुधर्मस्यप्रतियोगितावच्छेदकत्वस्वीकारात् अन्यथा प्रमेयवह्निमान्धूमादित्यत्रसाध्याभावाप्रसिद्ध्यातद्घटभिन्नंपटत्वादित्यत्रतादृशवृत्तित्वाभावाप्रसिद्ध्या चाव्याप्त्यापत्तेः । अथवा साध्यतावच्छेदकतात्वादिसमनियतप्रतियोगितोपादेया व्याप्यताच वह्नित्वगतैकत्वावच्छिन्नानुयोगिताक-

पर्य्याप्तीयतद्व्यक्तित्वावच्छिन्नप्रतियोगितायामेव ननु महानसीयत्व-वह्नित्वगतद्वित्वावच्छिन्नानुयोगिताकपर्य्याप्तीयप्रतियोगितायां सा-ध्यतावच्छेदकतात्वस्येति न दोषः साध्यतावच्छेदकत्वावृत्तिरूपवृ-त्तित्वमत्र विवक्षणीयं वृत्तित्वञ्च स्वावच्छिन्नानुयोगिताकपर्य्याप्तिप्र-तियोगितावच्छेदकधर्म्मशून्यत्वसम्बन्धेन तथाच वह्नित्वगतैकत्व-पर्य्याप्तिप्रतियोगितावच्छेदकतद्व्यक्तित्वशून्यत्वस्य महानसीयत्वनि-ष्ठावच्छेदकतायां सत्त्वेन महानसीयवह्निसाध्यकस्थले न वह्न्यभा-वस्य लक्षणघटकताप्रसङ्गः रूपवृत्तित्वञ्च परम्परायाः संसर्ग-त्वाभ्युपगमे यथाश्रुतमेवान्यथा तादृशरूपावच्छिन्नानुयोगिताक-पर्य्याप्तीयायानिरूपितत्वसम्बन्धावच्छिन्नाकिञ्चिन्निष्ठावच्छेदकताभि-न्नावच्छेदकतात्वानिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिता तदाश्रयावच्छेदकतानिरूपितत्वम् एवञ्चानुपदोक्तावृत्तित्वम-पि यत्किञ्चित्साध्यतावच्छेदकत्वावृत्तिधर्म्मानवच्छिन्नप्रतियोगि-ताकपर्य्याप्त्यनुयोगितावच्छेदकत्वरूपम्बाच्यमवच्छेदकतात्वावच्छि-न्नप्रतियोगितावारणाय चावच्छेदकतात्वन्यूनवृत्तिधर्म्मावच्छिन्न-त्वेन प्रतियोगिता विशेषणीया नन्वत्रतार्णवह्निर्विषयितया सा-ध्यतायां तज्ज्ञानत्वे सद्धेतौ वह्नितार्णाभावमादायाव्याप्तिः प्रति-योगित्वसाध्यत्वयोः समानधर्म्मावच्छिन्नत्वादिति चेन्न प्रतियोगि-ताभेदम्बिनाभावभेदस्या सम्भवेन तार्णवह्न्यभावप्रतियोगिताव-च्छेदकत्वन्तार्णत्वविशिष्टवह्नित्वेवह्नितार्णाभावप्रतियोगितावच्छेदक-त्वम्वह्नित्वविशिष्टतार्णत्वे वाच्यं तादृशावच्छेदकतात्वावच्छिन्नपर्य्या-प्त्यनुयोगितावच्छेदकत्वमपिबुद्धिभेदेनभिन्नयोस्तार्णत्ववह्नित्वगतद्वि-त्ववह्नित्वतार्णत्वगतद्वित्वयोः कल्पनीयमितितार्णवह्न्यभावप्रतियो-गितासमानप्रकृतसाध्यतावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकता-र्णत्ववह्नित्वगतद्वित्वे प्रतियोगिताया वृत्तित्वविरहेणाव्याप्त्यसम्भवा-दिति अथावच्छेदकतात्वावच्छिन्नत्वस्य तादृशावच्छेदकतात्वाति-रिक्तधर्म्मानवच्छिन्नत्वरूपतया तादृशावच्छेदकतात्वस्यापितादृशा-वच्छेदकतात्वगगनोभयभेदवत्वेनासम्भवप्रसङ्गः अवच्छेदकतात्वभे-दस्यापि तथैवपरिष्कारेऽनवस्थाप्रसङ्गः यदि च विलक्षणप्रतियो-गितासंसर्गेण तादृशावच्छेदकतात्वविशिष्टभेदवदच्छिन्नत्वविशिष्टा-भावत्ववरूपमेव तदित्युच्यते तदा विलक्षणस्वावच्छिन्नप्रतियोगि-

तासंसर्गेणसाध्यतावच्छेदकविशिष्टाभाव एव साध्याभावपदार्थो-ऽवलमुक्तक्रमेण पर्य्याप्तिघटिततद्व्युत्पादनेनेति चेत्सत्यम् उक्तरूपवृत्तित्वस्यतत्तद्धर्म्मावच्छिन्नत्वरूपताप्रतिपादनेन विलक्षणप्रतियोगितायांबालोव्युत्पादयितुं शक्यः नान्यथा । तद्घटकभेदादिषु तच्छङ्कायां तदादिशब्दोपबन्धेन तद्धर्म्मावच्छिन्नप्रतियोगिताकाभावश्च तद्धर्म्मातिरिक्तधर्म्मानवच्छिन्नप्रतियोगिताकाभाव इति सामान्येन विलक्षणप्रतियोगितामात्रे व्युत्पादयितुं शक्य इत्युक्तरूपेण लक्षणकरणन्नायुक्तमिति गृहाण। एवञ्च यद्यपिवह्निसाध्यकस्थलीयं लक्षणं वह्नित्वगतैकत्ववृत्तिप्रतियोगिताकाभाववद्वृत्तित्वमेवैवमेवचेतरसाध्यकस्थलीयमपि लक्षणं तथापि प्रकृतसाध्यतावच्छेदकत्वत्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगिताकाभाववद्वृत्तित्वादिना प्रतिपादनन्नायुक्तंसकृदुक्त्यैवं बालव्युत्पादनार्थत्वात् प्रकृतशब्दस्यतदादिवद्बुद्धिविषयतावच्छेदकावच्छिन्नत्वार्थकत्वात् अत्रोक्तावच्छेदकत्वं रूपस्यपरिचायकमात्रमन्यथा तद्विशेषितरूपवृत्तिप्रतियोगिताकाभाववद्वृत्तित्वनिश्चयस्य वह्नित्वगतैकत्ववृत्तिप्रतियोगिताकाभाववद्वृत्तित्वग्रहे प्रतिबन्धकत्वानुपपत्तेः एवञ्चतादृशावच्छेदकत्वसमानाधिकरणरूपनिष्ठावच्छेदकतानिरूपितवृत्तित्वनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितवृत्तितात्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वेनलक्षणता बोध्या। अथात्रैकत्वादेः पर्य्याप्त्यनभ्युपगमेवह्निमान्धूमादित्यादावव्याप्तिः कालिकेन महानसीयत्वविशिष्टस्य समवायेनवह्नित्वविशिष्टस्य साध्यतायां धूमे सद्धेतौ समवायेन महानसीयत्वविशिष्टस्य कालिकेन वह्नित्वविशिष्टस्याभावमादायाव्याप्तिश्च नचैतदभावमादायाव्याप्तिवारणाय साध्यतावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वमपि प्रतियोगिताविशेषणम्वाच्यं वैशिष्ट्यञ्च स्वसामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन तथाच प्रतियोगितानिरूपितमहानसीयत्वनिष्ठावच्छेदकतायास्साध्यतानिरूपितमहानसीयत्वनिष्ठावच्छेदकतावच्छेदकसम्बन्धानवच्छिन्नत्वान्नाव्याप्तिरिति वाच्यं कालिकेन प्रमेयविशिष्टत्वे सति समवायेन प्रमेयविशिष्टेयः कालिकेन महानसीयत्वविशिष्टत्वे सति समवाये-

न वह्नित्वविशिष्टस्तस्य साध्यतायां धूमे समवायेन महा-
नसीयत्वविशिष्टोक्तत्रितयविशिष्टाभावमादायाव्याप्तेः सामानाधिकर-
ण्यास्यिहाय व्यापकत्वस्यप्रवेशोऽपिसमवायेन वह्नित्वविशिष्टत्वे सति
कालिकेन वह्नित्वविशिष्टस्य विषयितया साध्यतायां तज्ज्ञानत्वे सद्धे-
तौ समवायेन वह्नित्वविशिष्टाभावमादायाव्याप्त्यापत्तेः नच साध्यताव-
च्छेदकताघटकसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगिताव-
च्छेदकरूपवृत्तित्वमेव साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नाव-
च्छेदकताकत्वं वृत्तित्वञ्च स्वनिरूपितावच्छेदकता घटकसंसर्गताव-
च्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तथाच
न दोष इति वाच्यं/कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन वह्नित्व-
विशिष्टत्वे सति समवायेन द्रव्यत्वविशिष्टस्य साध्यतायां तज्तानत्वे
कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन द्रव्यत्वविशिष्टाभावमा-
दायाव्याप्त्यापत्तेः/यद्यपि साध्यतावच्छेदकावच्छिन्नत्वं प्रकृते सा-
ध्यतासमनियतत्वं सामनैयत्यञ्च स्वनिरूपितावच्छेदकतावत्त्वसम्बन्धे-
न अवच्छेदकतावत्ता च स्वसामानाधिकरण्यस्वावच्छेदकसम्बन्धाव-
च्छिन्नत्वस्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन तथा च नप्रा-
गुक्तदोषाणामवकाशः तत्र प्रतियोगिताव्यापकत्वदिशि व्यापकताघ-
टकसम्बन्धकोटौ त्रयाणामुपादाने व्याप्यताघटकतया तत्तत्सम्बन्धा-
नामनुपादाने च घटत्व निष्ठावच्छेदकत्वकालिकसम्बन्धावच्छिन्नवह्नि-
त्वनिष्ठावच्छेदकत्वसावच्छिन्नवह्नित्वनिष्ठावच्छेदकत्वान्यादायवह्निमा-
न्धूमादित्यादौव्याप्तिलक्षणाप्रसक्तिःव्यापकताघटकसंसर्गेऽपि तदनुपा-
दाने विषयितया वह्निसाध्यकस्थले तार्णवन्ह्यभावमादायविषयितया
समवायेन वह्नित्वविशिष्टसाध्यकस्थले कालिकेन वह्नित्वविशिष्टत्वे
सति समावयेन वह्नित्वविशिष्टाभावमादाय विषयितयावह्निसाध्यक-
स्थले समवायेन वह्नित्वविशिष्टवन्ह्यभावमादायाव्याप्तिस्स्यादिति तत्त
त्सम्बन्धनिवेशः साध्यताव्यायकत्वादिशि व्याप्यताघटकसम्बन्ध-
कोटौ तत्तत्सम्बन्धानुपादान उक्तरीत्यैव वह्निमान्धूमादित्यत्राव्याप्ति-
स्स्यात् व्यापकताघटकसम्बन्धेष्वपि तेषामनुपादाने विषयितास-
म्बन्धेन तार्णवह्निसाध्यकस्थले वन्ह्यभावमादाय कालिकेन वह्नित्ववि-
शिष्टत्वे सति समवायेन वह्नित्वविशिष्टस्य विषयितया साध्यतायां
समवायेन वह्नित्वविशिष्टाभावमादायविषयितयावह्नित्वविशिष्टवह्निसा-

ध्यकस्थले वन्ह्यभावमादायाव्याप्तिस्स्यादिति तत्तत्सम्बन्धनिवेशः
अत्र तार्णवह्नेर्विन्नयितयासाध्यतायां वह्नितार्णाभावमादायाव्याप्तिवा-
रणायैकत्वादेः पर्य्याप्त्यभ्युपगमेन साध्यतावच्छेदकतात्वावच्छिन्न-
पर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वविवक्षणे स्वावच्छेदकसम्ब-
न्धावच्छिन्नत्वस्वसामानाधिकरण्योभयसम्बन्धेनावच्छेदकतावत्त्वम्वा-
च्यं तदुभय फलन्तु कालिकेन महानसीयत्वविशिष्टत्वे सति समवा-
येन वह्नित्वविशिष्टसाध्यकस्थले समवायेनमहानसीयत्वविशिष्टत्वे
सति कालिकेन वह्नित्वविशिष्टाभावमादायाव्याप्तिवारणं वह्नितार्णा-
भावमादायाव्याप्तिवारणायैकत्वादेः पर्य्याप्त्यनभ्युपगमे स्वाव-
च्छेद्यविशेष्यतावच्छेदकतावृत्तित्वसम्बन्धावच्छिन्नसाध्यत्वाभाववत्त्वं
प्रतियोगितावि शेषणं वृत्तित्वञ्च स्वात्मकसम्बन्धावच्छिन्नप्रमीयप्रका-
रत्वावच्छेद्यविशेष्यतावच्छेदकतावत्त्वसम्बन्धेन तद्वत्ता च सामाना-
धिकरण्यसम्बन्धेन प्रमीयत्वनिवेशादुक्तप्रतियोगितासम्बन्धेन तार्णव-
ह्निप्रकारकभ्रमसत्त्वेऽपि न क्षतिः एवञ्चावच्छेदकतावत्त्वं पूर्वोक्तत्रित-
यसम्बन्धेनैव सामनैयत्यव्यावृत्तिरपि पूर्ववत् तथापि कालिकेन महा-
नसीयत्वविशिष्टं सत्समवायेन वह्नित्वविशिष्टं यत्तद्विशिष्टस्य साध्य-
तायां सद्धेतौ समवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन व-
ह्नित्वविशिष्टं यत्तादात्म्येन तद्विशिष्टाभावमादायाव्याप्तेरनुद्धार एव स्वा-
नवच्छेदकानवच्छिन्नत्वस्य स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छे-
दकत्वानिरूपितत्त्वरूपत्वे तद्वारणेऽपि प्रागुक्तसाध्यात्मकाविशिष्टवत-
स्साध्यतायां प्रागुक्तयुक्त्याऽव्याप्तेरनुद्धार एव तद्वारणायोक्तवैशिष्ट्य-
स्य स्वसामानाधिकरण्य स्वावच्छेदकसम्बन्धावच्छिन्नत्व स्वनिरूपिता-
वच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वैतात्रितयसम्बन्धेन वि-
वक्षणेऽनवस्थाप्रसङ्ग इतिचेदत्रोच्यते साक्षात्परम्परासाधारणनिरू-
पितत्वमङ्गीकृत्यावच्छेदकतावत्त्वनियामकस्वानवच्छेदकानवच्छिन्नत्व
स्य स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकतानिरूपितत्वसम्ब-
न्धावच्छिन्नस्वाभाववत्वरूपत्वोक्तौ न दोषावकाशः वैशिष्ट्यञ्च स्वसा-
मानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन यत्तु
स्वानवच्छेदकानवच्छिन्नत्वस्य स्वसामानाधिकरण्येन स्वावच्छेदकता-
विशिष्टान्यावच्छेदकत्वानिरूपितत्वरूपत्वे प्रमेयसाध्यतावच्छेदकता-
वच्छेदकस्थलेस्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वाप्रसि-

द्धिस्स्यादिति स्वानवच्छेदकानवच्छिन्नत्वस्य वैशिष्ट्यघटकतयोपादानमावश्यकमेवेत्यनवस्थाप्रसङ्गः। नच स्वसाजात्यमेव वैशिष्ट्यघटकं तथासति निरवच्छिन्नावच्छेदकत्वे विशिष्टान्यत्वप्रसिद्धिः साजात्यञ्च सावच्छिन्नत्वनिरवच्छिन्नत्वान्यतररूपेण एवञ्च नानवस्थाप्रसङ्ग इति वाच्यं प्रमेयविशिष्टवत्तस्साध्यतायां घटत्वविशिष्टवद्भावमादायाव्याप्त्यापत्तेः। घटत्वत्वावच्छिन्नावच्छेदकतायां विशिष्टान्यत्वविरहादित्येवं केवलस्वानवच्छेदकानवच्छिन्नत्वस्यैवावच्छेदकतावत्त्वनियामकसंसर्गताम भ्युपेत्याप्यनवस्थापादनन्तन्न स्वनिरूपितयत्किञ्चिदवच्छेदकत्वावृत्तित्वसम्बन्धावच्छिन्नस्वाभाववत्त्वस्यैव तद्रूपतया विवक्षायान्तदसम्भवात् वृत्तित्वञ्च स्वनिरूपितावच्छेदकतासामानाधिकरण्यसम्बन्धेन एवञ्च घटत्वनिष्ठावच्छेदकतायां स्वनिरूपितप्रमेयत्वनिष्ठावच्छेदकत्वावृत्तित्वस्यैवसत्त्वेन न दोष इत्यलम् ॥

अथ निरवच्छिन्नात्मत्वादिसाध्यतास्थले साध्यतावच्छेदकाप्रसिद्ध्याऽव्याप्तिरिति चेन्न साध्यवदन्यावृत्तित्वादिरूपव्याप्तेरेव तस्य लक्ष्यत्वात्। यद्वा आत्मत्वत्वातिरिक्तधर्म्मानवच्छिन्नप्रतियोगिताकाभाववदवृत्तित्वस्यैव तत्र व्याप्तित्वादात्मत्वत्वस्य साध्यतानवच्छेदकत्वेऽपि क्षत्यभावात्। शब्दैक्यस्यानुपादेयत्वात्। केचित्तु साध्यताविशिष्टनिरूपकताकाधिकरणत्वाभाववदवृत्तित्वमेवायमात्माज्ञानादित्यादिस्थलसाधारण्यानुरोधेन व्याप्तिः। वैशिष्ट्यञ्च स्वसामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वानवच्छेदकानवच्छिन्नत्वस्ववृत्तित्वैतच्चतुष्टयसम्बन्धेन वृत्तित्वञ्च स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन तथा च न कोपि दोष इति। यत्तु साध्यताविशिष्टावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिनिरूपकताकाधिकरणत्वाभाववदवृत्तित्वं व्याप्तिः। वैशिष्ट्यञ्च स्वानिरूपितत्वनिरवच्छिन्नस्वसमानाधिकरणसाधारणधर्म्मनिष्ठावच्छेदकतात्वान्यतरसम्बन्धेन वृत्तित्वञ्चस्वावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तथाचायमात्माज्ञानादित्यत्र तादृशं रूपमात्मत्वनिष्ठतद्व्यक्तित्वगतैकत्वमेव प्रसिद्धमिति न दोष इति तत्तुच्छम्। पूर्वोक्तदोषेण पर्य्याप्तिघटितकल्पस्यानुपादेयत्वादिति वदन्ति। नन्वत्राधेयत्वसम्बन्धावच्छिन्नसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठाव-

च्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितवृत्तितात्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वेन तादृशाभावस्य लक्षणत्वेन तस्य च वह्नित्वेतरधर्म्मानवच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताकाभाववन्निरूपितवृत्तित्वाभावरूपस्य धूमहेतौ सत्त्वेनाव्याप्त्यभावाद्व्यर्थमेव प्रागुक्तसाध्यतावच्छेदकावच्छिन्नत्वपरिष्करणमिति चेन्न । महानसीयवह्निमान्धूमादित्यत्र वह्नित्वेतरधर्म्मानवच्छिन्नवह्नित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावाधिकरणनिरूपितवृतित्वाभावस्य हेतौ सत्त्वेनातिव्याप्त्यापत्तेः । न च साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितानुयोगित्वनिष्ठावच्छेदकतानिरूपितपर्य्याप्तिनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरुपितवृत्तितात्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वेन तादृशाभावप्रवेशेनोक्तदोष इति वाच्यम् । वह्निमान् महानसीयवह्निविषयकवह्निविषयकज्ञानमहानसीयवह्निविषयकज्ञानान्यतरत्वादित्यत्र वह्नित्वगतैकत्वावच्छिन्नानुयोगिताकपर्य्यामिकावच्छेकताकमहानसीयवह्नित्वावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावस्य हेतौ सत्त्वेनातिव्याप्त्यापत्तेः । तद्वारणायेतरवारकपर्य्याप्तिनिवेशे वृत्तित्वाभावकूटनिवेशे वा वह्निमान्धूमादित्यत्राव्याप्त्यापत्तेरुक्तपरिष्कारस्य सार्थक्यसम्भवादिति । अत एव साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिसाध्यनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वानिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितवृत्तितात्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वेन तादृशाभावनिवेशोऽप्यपास्तः । उक्तव्यभिचारिणि महानसीयवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावस्य हेतौ सत्त्वेनातिव्याप्त्यापत्तेः तद्वारणाय सामान्याभावस्य कूटस्य वा निवेशे वह्निमान्धूमादित्यत्राव्याप्त्यापत्तेरिति ॥ अथ तथाप्युक्तपरिष्कारो व्यर्थः । महानसीयवह्न्यभावस्य ह्रदवृत्तेर्य्यदधिकरणं तन्निरूपितवृत्तित्वाभावस्य महानसीयवह्न्यभावाधिकरणह्रदनिरूपितवृत्ति-

त्वाभावस्य तादृशवृत्तित्वघटोभयाभावस्य हेतौ सत्त्वेनाव्याप्त्यभावा-दिति चेन्न । उक्तयुक्त्यैव धूमवान्वह्नेरित्यादावतिव्याप्त्यापत्तया वृत्तित्व-सामान्याभावस्यैवप्रवेश्यतया ऽव्याप्तिवारणासम्भवात् नचैवमप्य-भावादिनिष्ठावच्छेदकतायान्तादृशप्रतियोगित्वादिनिष्ठावच्छेदकता-भिन्नावच्छेदकत्वानिरूपितत्वन्निवेश्यतांप्रतियोगित्वानिष्ठावच्छेदकता-यां तु प्रतियोगित्वविशेषणीभूतरूपवृत्तित्वनिष्ठावच्छेदकतानिरूपित-त्वमात्रमेव दोषाभावादिति वाच्यम् तत्क्षणविशिष्टप्रतियोगिताघटित-वृत्तित्वाभावमादायातिव्याप्तेस्तथासत्यवारणात् । वस्तुतस्तु साक्षा-त्परम्परासाधारणनिरूपितत्वस्य स्वीकृततयावृत्तित्वनिष्ठप्रतियोगि-तायामेव प्रतियोगितावच्छेदककोटिप्रविष्टतत्तद्धर्म्मनिष्ठावच्छेदकता-भिन्नावच्छेकत्वानिरूपितत्वं प्रवेश्यं लाघवादिति प्रतियोगिताविशे-षणधर्म्मावाच्छिन्नत्वस्येतरवारकस्य प्रवेश आवश्यक इति तद्व्यक्तेः स्वरूपतोभानाभ्युपगमे वह्न्यभावप्रतियोगितात्मकतद्व्यक्तिवह्न्यभा-वात्मकतद्व्यक्तिधूमाभावाधिकरणजलात्मकतद्व्यक्तीरादायधूमवान्वह्नेरि-त्यत्रातिव्याप्तिवारणायाधिकरणनिष्ठावच्छेदकतापर्य्यन्तन्तत्तदवच्छे-दकतानिरूपितत्वंनिवेश्यं वृत्तित्वानिष्ठप्रतियोगितायामवच्छेदकता-निरूपितत्वन्नोपादेयम् । स्वरूपसम्बन्धावाच्छिन्नत्वस्यप्रतियोगिता-यामावश्यकतया ध्वंसीयप्रतियोगितामादायदोषाप्रसक्तेः यत्तु प्रति योग्यंशे उपलक्षणविधयाभानस्यापि स्वीकृततया तादृशप्रतीतीय-प्रतियोगितामादाय दोष इति तन्न क्वचिदुपलक्षणविधया भानस्वी-कारेऽपि तस्य प्रतियोगितावच्छेदकत्वस्वीकारेण दोषासम्भवात् । परन्तु लक्ष्यमात्रवृत्तेरेवलक्षणत्वे व्याप्तिभिन्ने वृत्तित्वसामान्याभावे-ऽप्युक्ताभावस्य वृत्तितया तस्य व्याप्तिलक्षणत्वानुपपत्तिभयेनाधिकर-णादिनिष्ठावच्छेदकतानिरूपितत्वमुपादेयमेवोक्ताभावत्वेनवृत्तित्वसा-मान्याभावस्यापि व्याप्तित्वेनोपादेयमेवेत्यवधेयमिति दिक् ।

येन सम्बन्धेनेति अथ साध्यतावच्छेदकसम्बन्धावच्छिन्नत्व-प्रवेशेऽपि संयोगसमवायोभयसम्बन्धेन वह्निर्नास्तीत्यभावमादाया-व्याप्तिः । साध्यतानिरूपितसंसर्गतानवच्छेदकीभूतधर्म्मानवच्छिन्न संसर्गतानिरूपितत्वनिवेशे उक्तदोषवारणेऽपि संयोगत्वसमवाय-त्वान्यतरवत्सम्बन्धेनवह्निसाध्यकधूमे सवमायेन वह्न्यभावमादाया-व्याप्तेरनुद्धार इति चेन्न स्वनिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्न-

पर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिसंसर्गतानिरूपितत्वविवक्षायान्दोषाभावात् । एतेन साध्यतावच्छेदकसम्बन्धातिरिक्त सम्बन्धानवच्छिन्नत्वनिवेशे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य वैयर्थ्यमित्यप्यपास्तमुक्तनिवेशस्योभयपर्य्यवसायित्वात् ।

यत्तु रूपवान् । पृथिवीत्वादित्यादौ रूपध्वंसीयप्रतियोगितावारणाय तन्निवेश इति तन्न ध्वंसीयप्रतियोगितायां सामान्यधर्म्मावच्छिन्नत्वे मानाभावेन तस्य लक्षणाघटकत्वादिति एकत्वादेः पर्य्याप्त्यनभ्युपगमपक्षे साध्यतानिरूपितसंसर्गतासमनियतसंसर्गताकत्वं विवक्षितम् । सामनैयत्यञ्च स्वनिरूपितावच्छेदकतावत्त्वसम्बन्धेन । अवच्छेदकतावत्ताच । स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वसामानाधिकरण्योभयसम्बन्धेन समवायेनसाध्यतास्थले स्वरूपत्वावच्छिन्नसंसर्गतामादायाव्याप्तिवारणाय स्वसामानाधिकरण्यनिवेशः स्वसंयोगवृत्तिसंयोगत्वाश्रयस्य तदवच्छेदकत्वे च समवायेन तादृशासंयोगत्वावच्छिन्नसंसर्गतामादायाव्याप्तिवारणाय स्वावच्छेदकसम्बन्धावच्छिन्नत्वप्रवेशः अतएव स्वसंयुक्तघटसंयोगवृत्तितद्व्यक्तित्वस्य कालिकेन स्वसंयुक्तवायुसंयोगवृत्तिद्व्यक्तित्वस्य च स्वरूपेणाश्रयस्य संसर्गत्वे विनिमयेन तादृशतद्व्यक्तित्ववत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावमादायाव्याप्तिरित्यप्यपास्तामिति दिक् ।

अथ साध्यतावच्छेदकनिष्ठं यत्तन्निरूपकप्रतियोगिताकाभाव एव प्रवेश्यताङ्किमवच्छेदकत्व पदोपादानेनेति चेन्न समवायेनप्रमेयसाध्यकसत्वे प्रमेयत्वनिष्ठवृत्तितानिरूपक घटाभावीप्रतियोगितामादायाव्याप्त्यापत्तेः नच साध्यतावच्छेदकनिष्ठं यत्तन्निरूपितत्वमेववाच्यमधिकरणे वृत्तितानिरूपकत्वस्यैव सत्त्वेनाव्याप्त्यभावादिति वाच्यं घटाभावसाध्यकघटाभावत्वत्वे घटाभावत्वनिष्ठप्रतियोगित्वाभावाभावस्य प्रतियोगितारूपस्य स्वरूपसम्बन्धावच्छिन्नस्य साध्यतावच्छेकनिष्ठतया तन्निरूपित प्रतियोगित्वाभावनिष्ठप्रतियोगिताकाभावाधिकरणे घटाभावत्वे हेतोस्सत्वेनाव्याप्त्यापत्तेः नचावच्छेदकत्वाभावाभावस्यावच्छेदकतारूपस्य घटाभावत्वनिष्ठस्य निरूपिताया अवच्छेदकत्वाभावनिष्ठप्रतियोगिताया निरूपकीभूतस्याभावाधिकरणे हेतोः सत्त्वेनावच्छेदकत्वपदोपादनेऽपि अव्याप्तितादवस्थ्यमिति वाच्यं साध्यतावच्छेदकनिष्ठावच्छेदकतात्वावच्छिन्ननिरूपकतानिरूपितानिरूप्यतावत्त्वस्य विव-

क्षितत्वात् अवच्छेदकत्वाभावनिष्ठप्रतियोगितात्वेनावच्छेदकत्वाभावाभावत्वेनैव निरूप्यनिरूपकभावेनोक्तदोषासम्भवात् । ननु कालिकसम्बन्धावच्छिन्नघटत्वनिष्ठाधेयत्वेन; कालिकेन विशिष्टस्य तादात्म्येन साध्यतायां घटत्वे सद्धेतौस्वरूपसम्बन्धावच्छिन्नतादृशवृत्तित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावमादायाव्याप्तिः अवच्छेदकताया अवच्छेदकस्वरूपतानये स्वरूपसम्बन्धावच्छिन्नावच्छेदकत्वस्यापि कालिकसम्बन्धावच्छिन्नत्वादतःसाध्यतावच्छेदकताघटकसंसर्गतात्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यतावच्छेदकीभूतावच्छेदकतात्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यतावत्त्वम्विवक्षणीयन्तत्र निरूप्यतावच्छेदकतयावच्छेदकतात्वप्रवेशोविफलः घटाभावत्वानिष्ठप्रतियोगितात्वस्यैवोक्तानिरूप्यतावच्छेदकत्वेन तस्य प्रतियोगित्वाभावप्रतियोगितानिष्ठनिरूप्यतानिरूपितनिरूपकतानवच्छेदकत्वेन पूर्वोक्ताव्याप्तेरप्रसक्तेरितिचेदवच्छेदकतायाः पदार्थान्तरत्व उक्तरूपेण विवक्षायां प्रयोजनाभावात् अधिकरणस्यचासाधारणधर्म्मपुरस्कारेणानिरूप्यत्वेप्यधिकरणत्वविशिष्टस्य सनिरूपकत्वात्कस्येदमधिकरणमित्याकाङ्क्षादर्शनात्प्रमेयत्वनिष्ठवृत्तितामादाय पूर्वोक्ताव्याप्तेर्दुर्वारत्वात्तद्वाऽवच्छेदकतात्वमुपादेयमेवेति गृहाण। नच वह्नेर्वह्नित्वावच्छिन्नप्रतियोगित्वाभावानुयोगिकस्ववृत्तिवाच्यत्ववत्त्वादिसम्बन्धेन साध्यतायां तादृशाभावनिष्ठतद्व्यक्तित्वसद्धेतौवह्नित्वावच्छिन्नप्रतियोगितायाः प्रतियोगित्वाभावाभावात्मिकायानिरूपकस्य प्रतियोगित्वाभावनिष्ठप्रतियोगित्वस्य स्वाभावाभावतयाऽभावस्याधिकरणेहेतोः सत्त्वेनाव्याप्त्याप्रागुक्तनिरूप्यतावाच्छेदकीभूत प्रतियोगितात्वघटितधर्म्मावच्छिन्ननिरूपकतानिरूपितनिरूप्यतावत्त्वस्य विवक्षणीयतयावृत्तित्वनिष्ठनिरूपकतानिरूपितनिरूप्यतावच्छेदकाधिकरणत्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यत्वस्याभावे विरहेण प्रागुक्तदोषाप्रसक्तेर्नोपादेयमवच्छेदकतात्वमिति वाच्यमेवं सत्येतल्लाभायैवावच्छेदकतात्वस्योपादेयत्वात् वस्तुतस्तूक्तसार्थक्यप्रक्रियाया यथा श्रुतलक्षणाश्रितत्वेनाशिष्यबुद्धिवैशद्यमात्रप्रयोजनत्वमेव सिद्धान्ते पर्य्याप्तिघटितकल्पे सिद्धान्ततमे सामनैयत्यघटितकल्पे च वैयर्थ्यशङ्कापिनास्ति तथा हि साध्यतानिरूपितत्वावच्छिन्नपर्य्याप्तिप्रतियोगित्वस्य विवक्षितत्वे साध्यतानिरूपितत्वस्य

साध्यतात्वनिष्ठाधयेतादौ सत्त्वेन साध्यतानिरूपितत्वावच्छिन्नप-र्य्याप्त्यनुयोगितावच्छेदके साध्यतात्वसाध्यतावच्छेदकगतद्वित्वादौ प्रतियोगित्वस्य वृत्तित्वासम्भवेनासम्भवापत्तिः यत्किञ्चिन्निरूपित-त्वाविवक्षणे साध्यत्वाभावमादाय महानसयिवह्निसाध्यकस्थले व-ह्न्यभावादिकमादायाव्याप्त्यापत्तिः सामनैयत्यघटिते तु स्वनिरूपि-तत्वस्यैव संसर्गत्वे तेन च सम्बन्धेन साध्यत्वस्य साध्यतात्वनि-ष्ठवृत्तित्वे सत्त्वेन तत्र प्रतियोगित्वस्य सत्त्वासम्भवेनासम्भवापत्ति-रित्युपादेयमेवावच्छेदकतात्वमित्युपरम्यते ।

अत्र प्रतियोगित्वानुपादाने वह्नित्वनिष्ठावच्छेदकतात्मकाधिक-करणनिरूपिताधेयत्वनिरूपकावच्छेदकतात्मकाभावाधिकरणे वह्नित्वे वह्नित्वत्वस्य वृत्तितयाऽऽधेयतया वह्नौ साध्ये वह्नित्वत्वेऽव्याप्तिः यद्यप्यवच्छेदकतात्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यतावच्छेदकी-भूतधर्म्मावच्छिन्ननिरूपकत्वविवक्षायान्नसम्भवति आधेयतात्वेन ता-दृशावच्छेदकतात्वेन निरूप्यनिरूपकभावविरहात् तथापि घटाभावस्य साध्यतायां भूमहेतौ घटाभावत्वनिष्ठावच्छेदकतानिरूपितघटाभाव-त्वावच्छिन्नवृत्तितानिरूपकपटाभावाधिकरणे पर्व्वतादौ हेतोस्सत्वे-नाव्याप्तिर्भवत्येवेति प्रतियोगितात्वोपादानम् सामनैयत्यघटिते पर्याप्तिघटितेऽप्ययमेव दोषोबोध्यः नच प्रतियोगित्वोपादानेऽपि घटाभाववान् घटाभावत्वत्वादित्यादौ तादृशप्रतियोगितानिरूपिता-वच्छेदकत्वाधिककरणे घटाभावत्वे हेतोः सत्त्वेनाव्याप्तिरतोऽभाव-त्वावच्छिन्ननिरूपकत्वम्विवक्षणीयन्तथाच प्रतियोगित्वानुपादानेऽपि वृत्तितानिरूपकपटाभावात्मकाधिकरणमादाय न दोष इति वाच्यं घटाभावत्वावच्छिन्नवृत्तितानिरूकत्वस्य पटाभावत्वेन सम्भवात्पटा-भावस्य वृत्तित्वमिति प्रतीतेः नचाभावत्वावच्छिन्ननिरूपितत्वमेव-विवक्षणीयं पटाभावस्याधिकरणत्वेनैववृत्तितानिरूपितत्वाददोष इति वाच्यमभावे प्रतियोगित्वनिरूपकत्वस्यैव स्वीकारेऽसम्भवापत्तेरिति ध्येयम् ॥

अथ प्रतियोगितानिरूपकत्वेनैवाभावः प्रवेश्यतामभावत्वेन त-त्प्रवेशोव्यर्थ इति चेन्न वह्नित्वावच्छिन्नप्रतियोगितानिरूपकावच्छेद-कत्वाधिकरणे वह्नित्वे वह्नित्वत्वस्य वृत्त्या वह्निमान्वह्नित्वत्वादित्यत्रा-व्याप्तेः अवच्छेदकत्वस्यावच्छेदकत्वाभावाभावत्वेऽपि प्रतियोगितानि-

रूपकतावच्छेदकाभावत्वावच्छिन्नाधिकरणत्वस्य प्रवेशात्प्रतियोगितानिरूपकत्वविशिष्टाभावत्वावच्छिन्नाधिकरणत्वस्य वा प्रवेशाद्दोषासम्भवादिति यद्वा घटाभावस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकस्य स्वरूपेण साध्यतायां घटत्वे सद्धेतौ घटाभावत्वावच्छिन्न प्रतियोगितानिरूपकानुयोगित्वाधिकरणे घटे हेतोस्सत्वेनाव्याप्त्याभावत्वेनाभावप्रवेश इति बोध्यम् यत्तु तत्सम्बन्धावच्छिन्नाधेयत्वतत्संसर्गप्रतियोगित्वयोरैक्यपक्षमाश्रित्य संसर्गीयप्रतियोगितानिरूपकस्वाधिकरणत्वादिरूपसंसर्गस्य साध्यवत्ताबुद्धिविरोधिघटकस्वरूरूपेणाधिकरणे पर्वते स्वाधिकरणत्वसम्बन्धेन वह्निसाध्यकधूमहेतोर्वृत्त्याऽव्याप्तिरतोऽभावत्वेनाभावप्रवेश इति तन्न आधेयतानिष्ठकालिकासम्बन्धावच्छिन्नाधेयत्वस्य कालिकेन साध्यतायां घटत्वे प्रतियोगितायाः प्रतियोगिस्वरूपत्व आधेयत्वनिष्ठप्रतियोगिताया आधेयतात्मकत्वेन कालिकसम्बन्धावच्छिन्नतया तन्निरूपकाभाववतिघटे हेतोर्वृत्तित्वेनाव्याप्तिरतस्साध्यतानिरूपितसंसर्गतावच्छेदकीभूतधर्म्मावच्छिन्नसंसर्गतात्वावच्छिन्ननिरूप्यतानिरूपितप्रतियोगितात्वावच्छिन्ननिरूपकत्वस्य प्रवशनीयतया संसर्गतात्वेन सांसर्गिकप्रतियोगितात्वेन निरूप्यनिरूपकभावविरहेणाभावपदार्थप्रवेशमन्तराव्याप्तिविरहादिति ॥

अथ साध्याभावाधिकरणत्वं सम्बन्ध सामान्येनसाबन्धविशेषेण वा नाद्यः कालिकेन वह्न्यभावाधिकरणे पर्वते धूमस्य वृत्त्यावह्निमान्धूमादित्यत्राव्याप्त्यापत्तेः न द्वितीयः तद्धि न स्वरूपं घटत्वाभाववान् पटत्वादित्यत्राव्याप्त्यापत्तेः नाप्यत एव संयोगः नापि समवायः घटाधिकरणत्वाभाववान् तद्व्यक्तित्वादित्यत्राव्याप्तेः अत्र केचिदभावाभावस्यातिरिक्तत्वे स्वरूपेण साध्याभावाधिकरणत्वविवक्षायां न दोष इत्याहुः अन्येतु घटत्वाभावाभावस्य घटत्वरूपत्वेऽपि घटत्वत्वेनैव स्वरूपेण विरोधस्सत्त्वायांनतु घटत्वाभावाभावत्वेन तथा च साध्याभावत्वावच्छिन्नस्य स्वरूपेणाधिकरणत्वविवक्षायान्नदोष इति वदन्ति। येतु स्वरूपसमवायान्यतरसम्बन्धेन साध्याभावाधिकरणत्वविवक्षायान्न दोषः नच संयोगसम्बन्धावच्छिन्नघटाभावे साध्ये कपालत्वहेतौघटात्मकसाध्याभावस्य समवायेनाधिकरणेकपालत्वस्यवृत्तित्वादव्याप्तिरिति वाच्यं तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावाभावत्वावच्छिन्नस्य

तेनैवाधिकरणत्वस्वीकारेणोक्तदोषासम्भवात् नचान्यतरसम्बन्धेन
तदवच्छिन्नाधिकरणत्वाप्रसिद्धिरिति वाच्यम् संयोगस्वरूपसमवाया-
न्यतमसम्बन्धेनाधिकरणत्वस्य विवक्षितत्वादिति मन्यन्ते तेषां कालि-
कसम्बन्धावच्छिन्नप्रतियोगिताकात्मत्वाभावे साध्य आत्मत्वे साध्या-
भावत्वावच्छिन्नाधिकरणत्वाप्रसिद्ध्या कालिकसम्बन्धघटितान्यतमस-
म्बन्धोपादाने वह्निमान्धूमादित्यादौचाव्याप्तिर्दुरुद्धरैवेतिबोध्यम् ॥

नव्यास्तु साध्यवत्ताबुद्धिविरोधिताघटकसम्बन्धेन साध्याभा-
वाधिकरणत्वोक्तौ न कोऽपिदोषः। साध्यवत्ताबुद्धिविरोधित्वञ्च सा-
ध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेद-
करूपवृत्तिप्रकारतानिरूपिताकिञ्चिद्धर्म्मावच्छिन्नविशेष्यताकग्रहत्व-
व्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वम्बोध्यम्। नच तादृशप्रका-
रत्वावच्छिन्नप्रतिबध्यत्वमेवोच्यतामलं व्यापकत्वप्रवेशेनेति वाच्यम्
कालिकसम्बन्धावच्छिन्नप्रतियोगिताकात्मत्वाधिकरणत्वाभावसाध्य-
कस्थले स्वरूपेण तादृशात्मत्वाधिकरणत्वाभावगगनत्वोभयाभाववद्-
वह्नित्वमित्यादिनिश्चयप्रतिबन्धकतानिरूपिताया एकत्रद्वयंरीतिज्ञान-
साधारणप्रतिबध्यतायास्तादृशप्रकारित्वावच्छिन्नत्वेन स्वरूपस्यापिवि-
रोधिताघटकसम्बन्धत्वेनाव्याप्त्यापत्तेः प्रतिबध्यता च साध्यतावच्छे-
दकविशिष्टविषयकग्रहत्वाव्यापिका ग्राह्या नातो वह्निमत्पर्व्वतकालीना-
त्मत्वाधिकरणत्वाभावसाध्यकस्थले स्वरूपसम्बन्धमादायाव्याप्तिरिति
वस्तुतस्तादृशप्रतिबन्धकतावच्छेदकप्रकारताविशिष्टसाध्याभावत्वाव-
च्छिन्ननिरूपकत्वमवश्यं वाच्यं वैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धाव-
च्छिन्नत्वं स्वावच्छेदकीभूतधर्म्मावच्छिन्नत्वोभयसम्बन्धेन तथाच पू-
र्वोक्तदोषद्वयस्यासम्भवेन तादृशग्रहत्वव्यापकत्वमव्यापकत्वञ्च नवि-
वक्षणीयम् अतएव कालिकेन वह्न्यभावव्याप्यधूमस्य कालिकेन बुद्धेः
प्रतिबन्धकतया तदवच्छेदककालिकसम्बन्धावच्छिन्नसाध्याभावत्वा-
वच्छिन्ननिरूपकताकाधिकरणत्वमादाय न दोषः निरूपकतायां सा-
ध्याभावत्वावच्छिन्नत्वप्रवेशाद्घटस्य प्रतियोगितया साध्यतायां घ-
टाभावत्वे हेतौ पटाभावः प्रतियोगितया घटवानितिबुद्धिप्रतिबन्ध-
कीभूतस्य पटाभावे घटाभाव इति ज्ञानस्य या प्रकारता तद्विशिष्टस्व-
रूपसम्बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्नपटाभावत्वावच्छिन्ननिरू-
पकताकाधिकरणतावति घटाभावे हेतोः सत्त्वेऽपि नाव्याप्तिः । नच

प्रकारतायामाधेयत्वसम्बन्धानवच्छिन्नत्वम्वाच्यमिति वाच्यमाधेयत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभावसाध्यकस्थले तादृशाभावाभावत्वावच्छिन्नस्यान्यसम्बन्धेन सत्ताविरहेणाव्याप्त्यापत्तेः नच स्वावच्छेदकधर्मावच्छिन्नत्वम्विहाय स्वसामानाधिकरण्यस्यैवास्तु 'सम्बन्धतेति वाच्यं घटवृत्तित्वाभावस्य कालिकसम्बन्धावच्छिन्नाभावे साध्य आत्मत्वे साध्यवान्घटइतिबुद्धिप्रतिबन्धकीभूतायास्साध्यंघटावृत्तीतिबुद्धेर्य्यास्वरूपसम्बन्धावच्छिन्नघटवृत्तित्वाभावत्वावच्छिन्नप्रकारतातद्विशिष्टनिरूपकतामादायाव्याप्त्यापत्तेः स्वावच्छेदकधर्म्मावच्छिन्नत्वमपि पर्य्याप्तिगर्भं वाच्यमन्यथाऽनुपदोक्तस्थले महानसीयवह्न्यादिसाध्यकस्थले च कालिकेन वह्निसामान्याभावव्याप्यमहानसीयवह्न्यभाववानितिप्रतिबन्धकज्ञानीयप्रकारतामादायाव्याप्त्यापत्तेः प्रतिबध्यता च साध्याभावविषयत्वानवच्छिन्ना ग्राह्यानातोविषयतात्वसाध्यकप्रकारतात्वे सद्धेतौ विषयतात्वाभावोविषयतात्ववानितिबुद्धिप्रतिबन्धकस्य विषयतात्वाभावे विषयतात्वाभाव इतिज्ञानस्य या स्वरूपसम्बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्नविषयतात्वाभावत्वावच्छिन्नप्रकारता तामादायाव्याप्त्यापत्तिः प्रतिबन्धकतावच्छेदकता च प्रकारतात्वावच्छिन्ना वाच्या तेन ह्रदवृत्तिवह्न्यभाववान् कालिकेनपर्व्वतइतिज्ञानीया या ह्रदवृत्तित्वप्रकारतानिरूपितविशेष्यतात्वेन प्रतिबन्धकतावच्छेदिकायाः कालिकसम्बन्धावच्छिन्नवह्न्यभावत्वावच्छिन्नप्रकारतायाः कालिकसम्बन्धावच्छिन्ननिरूपकतायां सत्त्वेऽपि न वह्निमान्धूमादित्यत्राव्याप्तिः प्रकारता चावच्छेकदतानात्मिकात्र विवक्षिता नातोवह्नेः साध्यतायान्तद्वह्नित्वे सद्धेतौ वह्न्यभावव्याप्यवत्तानिश्चयप्रतिबन्धकतावच्छेदकप्रतियोगित्वसम्बन्धावच्छिन्नवह्न्यभावत्वावच्छिन्नप्रकारतामादायाव्याप्तिः तादृशप्रकारताया अवच्छेदकतात्वेनावच्छेदकत्वपक्षेऽवच्छेदकतानात्मकत्वन्नोपादेयम् प्रतिबन्कता च ज्ञानवैशिष्ट्यानवच्छिन्ना ग्राह्या तेन स्वरूपेणह्रयवभाववान्कालिकेनवह्न्यभाववानितिनिश्चयविशिष्टस्य कालिकेन वह्न्यभाववानिति निश्चयस्य प्रतिबन्धकत्वेऽपि न क्षतिः अथ महानसीपवह्निसाध्यकतद्धूमहेतुकस्थले वह्न्यभाववदभाववत्कालीन घटोमहानसीयवह्निमानितिबुद्धौ तादृशघटः कालिकेनमाहानसीयवन्ह्यभाववानित्यस्य प्रतिबन्धकतया तदीपप्रकारतामादायाव्याप्तिः

नच तस्य निश्चयविशिष्टनिश्चयत्वेनैव प्रतिबन्धकत्वं तादृशघटत्वावच्छिन्नविशेष्यतानिरूपिताभावत्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन प्रतिबन्धकत्वसम्भवे निश्चयविशिष्टनिश्चयत्वेनप्रतिबन्धकत्वे मानाभावात् नचसाध्याभावविषयत्वानवच्छिन्नत्वेन प्रतिबध्यत्वस्य वारणं वन्ह्यभावस्यासाध्याभावत्वात्। सध्यप्रतियोगिकाभावनिवेशे वन्ह्यभावकालीनमहानसीयवह्निसाध्यकस्थले महासीयवह्न्यभावकालीनवह्निसाध्यकस्थले चाव्याप्त्यापत्तेरितिचेन्न तादृशप्रतिबन्धकतावच्छेदकताविशिष्टनिरूपकताया विवक्षितत्वात् वैशिष्ट्यञ्च स्वाश्रयावच्छेदकसम्बन्धावच्छिन्नत्व स्वनिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वोभयसम्बन्धेन तथासत्यभावत्वावच्छिन्न प्रकारतात्वावच्छिन्नावच्छेदकतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकाभावत्वगतैकत्ववृत्तित्वस्यानिरूपकतायां विरहेणाव्याप्त्यसम्भवात्।

यद्वा साध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वं प्रतिबध्यतायान्निवेशनीयम्। वृत्तित्वञ्चस्वनिरूपित प्रकारत्वनिष्ठावच्छेदकतानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुपयोगितावच्छेदकत्वसम्बन्धेन तथाचोक्तप्रतिबध्यताया उक्तसम्बन्धेन वह्नित्वगतैकत्व एव वृत्तित्वन्नतु महानसीयत्ववह्नित्वगतद्वित्व इति न दोष एवम् साध्यवत्ताग्रहप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकप्रकारतावच्छेदकसम्बन्धावच्छिन्नत्वाविवक्षयैवोक्तदोषो वारणीयः एतस्य च परिष्कारः स्वयमुह्य एतेन महानसीयवह्निव्यापकाभाववदभाववत्कालीनघटधर्म्मिकमहानसीयवह्निमत्ताबुद्धिप्रतिबन्धकतामादायाव्याप्तिरुक्तविवक्षायामप्यनिवार्य्येति निरस्तम् अथवा साध्याभावविषयत्वानवच्छिन्नत्वमपरित्यज्यैकत्ववृत्तिविशेष्यत्वावच्छिन्नत्वस्यप्रतिबध्यत्वविशेषणतया विवक्षायान्नकोऽपिदोष इति। नच घटभिन्नङ्कपालत्वादित्यत्र साध्याभावस्य घटत्वरूपस्य विरोधिताघटकसमवायेनाधिकरणे कपाले हेतोर्वृत्त्याऽव्याप्तिरिति वाच्यम् तस्य घटत्वस्वरूपत्वे ऽपि घटभेदाभावात्वावच्छिन्नाधिकरणतायाः घट एव स्वीकारेणादोषासम्भवादितिप्राहुः॥

परेतु साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्य-

नुयोगितावच्छेदकरूपवृत्तित्वे सति साध्यतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिसंसर्गताकप्रतियोगिताकाभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्याभावाधिकरणत्वविवक्षायान्नदोषः वृत्यन्तमात्मत्वप्रकारकप्रमाविशेष्यत्वस्य कालिकेनाभावस्य स्वरूपेण साध्यतायामात्मत्वे कालिकसम्बन्धावच्छिन्नसाध्याभावस्य स्वरूपेणाभावस्य साध्यात्मकतया तत्प्रतियोगितावच्छेदकस्वरूपेण साध्याभावाधिकरणे हेतोर्वृत्त्याऽव्याप्तियारणाय विशेष्यत्वाभावसाध्यकस्थले तादृशप्रतियोगितावच्छेदकोयो यः सम्बन्ध स्तत्तत्सम्बन्धेन साध्याभावाधिकरणत्वविवक्षणे स्वरूपकालिकाभ्यां विशेष्यत्वाधिकरणे जन्यआत्मत्वहेतो रवृत्त्याऽव्याप्तिविरहाद्विशेष्यत्व आत्मत्वप्रकारकप्रमानिरूपितत्वनिवेशनन्तथासति तस्योभयसम्बन्धेनाधिकरणत्वाप्रसिद्धैवाव्याप्तिसम्भवः । अथात्मानुयोगिकस्वरूपसम्बन्धावच्छिन्नसाध्याभावस्यात्मत्वप्रकारकप्रमाविशेष्यतानात्मकतया तदभावस्य स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्यात्मानुयोगिकस्वरूपेण वृत्तिमत्साध्यस्वरूपतया तदवच्छेदकस्वरूपमादायात्मत्वप्रकारकप्रमाविशेष्यत्वाभाववानात्मत्वादित्यत्राव्याप्त्या तद्घटासमानकालीनघटस्य कालितकेन योऽभावस्तस्यतद्घटानुयोगिकस्वरूपेणसाध्यतायान्तद्घटत्वे स्वरूपेण साध्याभावस्योक्तघटस्वरूपतया कालिकेन तदभावस्य साध्यात्मकस्य प्रतियोगितावच्छेदकेन कालिकेन साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभावस्य तद्घटसमानकालीनपदार्थान्तरवृत्तितया ऽतिरिक्तस्याधिकरणे हेतोर्वृत्त्याऽव्याप्त्या च रूपवृत्तिसंसर्गताकत्वमवश्यं विवक्षणीयन्तथाचात्मत्वप्रकारकप्रमाविशेष्यत्वाभावस्य स्वरूपेणाभावस्योक्तविशेष्यत्वरूपतया स्वरूपेण तदभावस्य सर्व्वथा त्मावृत्तेस्साध्यस्वरूपत्वविरहेणाव्याप्त्यभावात् साध्यप्रतियोगिकत्वनिवेशनम्व्यर्थमिति चेन्न कालिकेन घटाभावस्य यः कालिकेनाभावस्तस्यकालिकेन साध्यतायां जन्यत्वहेतावव्याप्तेः साध्यताधच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकघटाभाववृत्तिसाध्यनिरूपितप्रतियोगितावच्छेदकेन कालिकेन साध्याभावाधिकरणे जन्यत्वहेतोर्वृत्तेः नचैमवपि रूपवृत्तिप्रतियोगिताकत्वनिवेशनव्व्यर्थमिति वाच्यम् आत्मवृत्तित्वविशिष्टोक्तविशे-

ध्यत्वाभावस्य यस्स्वरूपेणाभावस्तस्यातिरिक्तस्य स्वरूपेणाभावस्य आत्मवृत्तित्वविशिष्टोक्तविशेष्यत्वाभावरूपत्वेन साध्यतया तत्प्रतियोगितावच्छेदकस्वरूपमादायात्मत्वप्रकारकप्रमाविशेष्यत्वाभाववानात्मत्वादित्यादौ तद्घटवृत्तितद्घटासमानकालीनघटाभावस्य स्वरूपेण साध्यतायांतद्घटत्वे शुद्धतादृशघटाभावाभावस्य तादृशघटरूपतया कालिकेन तदभावात्मकसाध्यप्रतियोगितावच्छेदककालिकमादायाव्याप्त्यापत्तेश्चेति ।

यत्तु प्रतियोगित्वोपादानमनर्थकमिति तन्न तादृशरूपवृत्तिसाध्यतावच्छेदकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वाभावत्वावच्छिन्नवृत्तितानिरूपकस्य कालिकसम्बन्धावच्छिन्नसाध्याभावस्य स्वरूपेणाभावात्मकसाध्यप्रतियोगितावच्छेदकस्वरूपमादायाव्याप्त्यापत्तेः नचैवमप्यभावत्वेन अभावप्रवेशो व्यर्थ इति वाच्यं कालिकेनावच्छेदकत्वाभावस्य कालिकेन साध्यतायां, जन्यत्वे तादृशप्रतियोगितानिरूपकावच्छेदकतावृत्तिसाध्यनिरूपितप्रतियोगितावच्छेदककालिकसम्बन्धेन साध्याभाववति हेतोर्वृत्त्याऽव्याप्त्यापत्तेः, अथ कालिकेनप्रमेयाभावस्य कालिकेन साध्यतायां जन्यत्वहेतौ साध्यनिरूपितप्रमेयत्वावच्छिन्नप्रतियोगिताया निखिलप्रमेयवृत्तेस्साध्याभाववृत्तितया तदवच्छेदकालिकमादायाव्याप्तिरभावोपादानेऽपि दुर्वारैवेति चेन्मैवम् अभावोपादानेसाध्याभावत्वसमनियतप्रतियोगिताकत्वस्य विवक्षितुंशक्यतयोक्तदोषवारणसम्भवादन्यथा तादृशप्रतियोगिताकत्वस्यावच्छेदकत्वादिसाधारणतया तत्समनियतप्रतियोगित्वाप्रसिद्ध्याऽसम्भवापत्तेः नच प्रमेयाभावसाध्यकस्थलीयदोषस्य व्याप्यत्वविवक्षयापि वारणसम्भवेन व्यापकत्वनिवेशे प्रयोजनाभावादभावत्वप्रवेशो व्यर्थ इति वाच्यं । समवायसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावस्य स्वरूपेण साध्यतायां जातित्वादिहेतावव्याप्त्यापत्तेः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य यः स्वरूपेणाभावस्तस्यापि साध्यरूपतया तदीयप्रतियोगित्वस्य केवलान्वयिनः साध्याभावत्वस्य व्याप्यतया च तदवच्छेदकस्वरूपेण साध्याभावाधिकरणे हेतौ वृत्तेः यद्वा सामान्यीयप्रतियोगितायां साध्याभावत्वावच्छिन्नत्वमुपादेयन्तथाच कालिकेन प्रमेयाभावसाध्यकस्थले न दोषः कालिकसम्बन्धावच्छिन्नप्रतियोगितायाः

साध्याभावत्वानवच्छिन्नत्वात् नच साध्यतावच्छेदकावच्छिन्न साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिकत्वावच्छिन्नत्वमेवोच्यतामलमभावत्वप्रवेशेनेतिवाच्यं तादृशप्रतियोगितात्वावच्छिन्ननिरूप्यतानिरूपितनिरूपकतावत्संसर्गतालाभार्थत्वात् तदप्रवेशे विशेष्यत्वाभावस्य स्वरूपसम्बन्धेन साध्यतायामात्मत्वे स्वाभाववत्त्वसंसर्गीया या साध्याभावत्वावच्छिन्ना प्रतियोगिता तस्यास्तत्संसर्गेण साध्यात्मकेन निरूपिततया तत्सम्बन्धावच्छिन्नाधेयतारूपतयाच तदवच्छेदकस्वाभाववत्त्वसम्बन्धेन साध्याभावाधिकरणे हेतोर्वृत्तित्वात् अत्यन्ताभावनिरूपितत्वोपादाने संसर्गीयप्रतियोगितामादायोक्तदोषासम्भवेऽपि अत्यन्ताभावत्वसाध्यकतद्व्यक्तित्वे सद्धेतौ साध्याभावनिष्ठा या स्वाभाववत्वससर्गीयप्रतियोगिता तामादायाव्याप्तिः। प्रतियोगित्वाधेयत्वादीनामाश्रयात्मकत्वेनैकत्वे वह्निनिष्ठसंयोगसम्बन्धावच्छिन्नप्रतियोगित्वकालिकसम्बन्धावच्छिन्नाधेयत्वयोरैक्येन कालिकस्य प्रतियोगितावच्छेदकसंसर्गत्वेनाव्याप्तिश्च दुर्व्वारास्यादित्यवधेयम् अथ घटभिन्नंपटत्वादित्यत्र साध्याभावस्यघटत्वस्वरूपतया तद्वृत्तिभेदीयप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिः। साध्याभावस्य घटात्मकत्वे प्रतियोगित्वप्रसिद्धावपि तदवच्छेदकतादात्म्येन घटत्वात्मकसाध्याभावस्याधिकणे घटत्वत्वस्य वृत्त्याऽव्याप्तश्चापत्तिर्घटभिन्नं घटत्वत्वादित्यादावितिचेन्न धर्म्मिभेदधर्म्मात्यन्ताभावयोरैक्यस्वीकारेण घटत्वनिष्ठप्रतियोगिताया अपि भेदेनिरूपितत्वसम्भवात्। नच घटभिन्नं घटत्वत्वादित्यत्राव्याप्तितादवस्थ्यमिति वाच्यम्। अत्यन्ताभावत्वनिरूपितत्वेनप्रतियोगित्वस्यविशेषणीयत्वात्। अथैवमपि घटभिन्नं कपालत्वादित्यत्रात्यन्ताभावत्वनिरूपितप्रतियोगितावच्छेदकसमवायेन घटात्मकसाध्याभावाधिकरणे कपाले कपालत्वहेतोर्वृत्तितयाऽव्याप्त्यापत्तिः नच साध्याभावत्वावच्छिन्ननिरूपकतायां तादृशप्रतियोगिताविशिष्टत्वं स्वसामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन वाच्यं तथाच घटत्वनिष्ठसमवायसम्बन्धावच्छिन्नप्रतियोगिताविशिष्टत्वस्य घटनिष्ठनिरूपकतायास्विरहान्नाव्याप्तिः एवं साध्याभावस्य घटघटत्वोभयात्मकत्वेऽपि तादात्म्यावच्छिन्नायास्समवायावच्छिन्नाया वा घटभेदाभावत्वावच्छिन्ननिरूपकताया निरूपितमधिकरणत्वं घट एव कपालादिषुघट-

भेदोभावस्तीत्यप्रत्ययात् । तथाच विनाऽयुक्तनिवेशस्वारणसम्भव इति वाच्यम् अत्यन्ताभावत्वनिरूपितत्वस्य व्यर्थत्वापत्तेरितिचेन्न। अभावाभावस्य प्रतियोगिरूपत्वस्यापि दर्शनाद्घटस्य तादात्म्येन साध्यतायां घटभेदाभावस्यघटानात्मकत्वेसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तेश्च घटभेदाभावस्य घटस्वरूपत्वेऽपि लाघवाद्घटभेदाभावत्वावच्छिन्नाधिकरणतानिरूपकत्वस्य घटत्वे एवस्वीकरणीयत्वात् तथाच न घटाधिकरणतामादायघटभिन्नकपालत्वादित्यत्राव्याप्तिप्रसक्तिः नवात्यन्ताभावत्वनिरूपितत्ववैयर्थ्ये यदिचात्यन्ताभावत्वभेदत्वयोर्विरुद्धत्वेऽत्यन्ताभावत्वनिरूपितप्रतियोगितायास्भेदात्मकसाध्यानिरूपितत्वासम्भवः एवम् भेदाभावस्यभेदप्रतियोगितत्वावच्छेदकान्यतररूपताया एव सिद्धान्तत्वेन वादात्म्येनघटविशिष्टभेदसाध्यकस्थले भेदाभावस्योभयथैव घटरूपतया तदत्यन्ताभावस्य साध्यानात्मकत्वेनात्यन्ताभावत्वानिरूपितसाध्यनिरूपितप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिरिति विभाव्यते तदा साध्याभावत्वसमनियतंसाध्याभावत्वावच्छिन्नम्वा यदत्यन्ताभावत्वनिरूपितं साध्यनिरूपितप्रतियोगित्वं यच्च साध्याभाववृत्तिभेदत्वनिरूपितसाध्यनिरूपितप्रतियोगितावच्छेदत्वं तदन्यतरविशिष्टसाध्याभावत्वावच्छिन्ननिरूपकत्वम्विवक्षणीयम्। वैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन एवञ्च घटभिन्नं घटत्वत्वाद्घटभिन्नं कपालत्वादित्यत्र घटत्वनिष्ठतादात्म्यावच्छिन्नघटनिष्ठसमवायावच्छिन्ननिरूपकत्वआदायनाव्याप्तिः भवति च तादात्म्यावच्छिन्ना घटत्वनिष्ठा निरूपकतापि तादृशीत्यत्यन्ताभावत्वनिरूपितत्वप्रवेशः तथाच भेदप्रतियोगितानिरूपितसमवायावच्छिन्नावच्छेदकतैव घटभेदाभावाभावस्य घटभेदानात्मकत्वेऽपि साध्याभाववृत्तिरिति न दोषः कालिकेन घटविशिष्टस्य समवायावच्छिन्नाभावस्य साध्यत्वे गुणत्वादौ कालिकेन घटविशिष्टात्मकसाध्याभावस्य घटस्यापि स्वरूपतया तद्वृत्तिसाध्यानिरूपितप्रतियोगितावच्छेदकताघटककालिकमादायाव्याप्तिवारणायभेदत्वनिरूपितत्वं प्रतियोगिताविशेषणम्। साध्यतावच्छेदकगतरूपवृत्तिसाध्यतानिरूपितसंसर्गतावच्छेदकगतरूपवृत्तिससर्गताकप्रतियोगिताकाभाववृत्तित्वप्रवेशफलं पूर्ववदेव इयाँस्तु विशेषो यत्तत्र तदत्यन्ताभावाभावमादायात्र तदत्यन्ताभाव-

वद्भेदमादायेति नच कालिकेनप्रमेयवद्घटभेदस्य साध्यतायांसद्धेतौ-कालिकसम्बन्धावच्छिन्नप्रमेयत्वावच्छिन्नावच्छेदकतामादायाव्याप्ति-रितिवाच्यम् । साध्याभावत्वावच्छिन्नाधिकरणतायाः कालिकेनापि-घटत्वएवसत्त्वात् समवायेनघटत्वाधिकरणवृत्तित्वविशिष्टप्रमेयस्यैव साध्याभावत्वात् उभयस्य साध्याभावरूपत्वे तु तादृशावच्छेदकता-त्वव्यापकत्त्वतादृशप्रतियोगितावत्त्वान्यतरवदधिकरणावृत्तित्वमेव व्याप्तिः व्यापकता च स्वनिष्ठाधिरणतानिरूपितसाध्याभावत्वावच्छिन्न-निरूपकतावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन प्रतियोगितावत्त्वा-व स्वावच्छेदकसम्बन्धावच्छिन्नसाध्याभावाभावावच्छिन्ननिरूपकता-काधिकरणतावत्त्वसम्बन्धेन तथाच नाव्याप्तिरिति । एतेन कालिक-सम्बन्धेनप्रमेयविशिष्टभेदस्य विषयितया साध्यतायान्तज्ज्ञानत्वे प्रमे-यनिष्ठावच्छेदकताघटककालिकमादायाव्याप्तिरित्यपास्तम् तादृशा-वच्छेदकतात्वस्यस्वरूपसम्बन्धावच्छिन्नावच्छेदकतायामपि सत्त्वेन-तत्र साध्याधिकरणज्ञानस्यासत्त्वात् यद्वा अवच्छेदकतायां साध्या-भावत्वसमनियतत्वंप्रवेश्यंकालिकावच्छिन्नावच्छेदकताया अतादृश-त्वान्नाव्याप्तिरिति कालिकेनप्रमेयविशिष्टघटभेदसाध्यकस्थलाव्या-प्तिश्च साध्याभावत्वस्य घटत्वमात्रस्वीकाराद्वारणीया ।

अथ सर्वत्रैवसाध्याभाववद्भेदमादायलक्षणस्यसम्भवात्साध्यनि-रूपितप्रतियोगितावच्छेदकताघटकसम्बन्धमात्रमुपादेयंव्यर्थमन्यत-रोपादानमितिचेन्न कपिसंयोग्येतत्त्वादित्यादित्यत्र शुद्धस्वरूपेणक-कपिसंयोगाभाववद्भेदस्यालीकत्वान्निरवच्छिन्नस्वरूपेण कपिसंयो-गाभाववद्भेदस्य मूलावच्छेदेनापि सत्तया कपिसंयोगास्वरूपत्वाद-व्याप्तेस्सर्वथैवदुरुद्धरत्वादिति यद्यप्यातिरिक्ते कपिसंयोगिभेदाभावे कपिसंयोगिभेदनिरूपितप्रतियोगितावच्छेदकत्वन्नास्तीतिभवतिमति-स्तथाप्यतिरिक्तकपिसंयोगिभेदाभाववद्भेदस्यसाध्यीभूतकपिसंयोगि-भेदरूपतयातन्निरूपितप्रतियोगितावच्छेदकत्वस्य साध्याभावे सम्भ-वेन कपिसयोगिभिन्नंगुणत्वादित्यादौ नाव्याप्तिसम्भवः ॥ नन्वत्र वि-षयितयावह्निस्साध्यतायान्तज्ज्ञानत्वेऽव्याप्तिः विषयित्वसम्बन्धाव-च्छिन्नवह्न्यभावाभावत्वावच्छिन्नाधिकरणत्वस्य विषयितया वह्निज्ञा-नेऽसम्भवात्तज्ज्ञानस्यतादृशाभावत्वेन वह्न्यनवगाहित्वात्स्वरूपेण त-स्य सत्त्वम्वाच्यमिति न तस्य वह्निरूपत्वमिति साध्याभाववृत्तिसा-

ध्यसामान्यीयप्रतियोगित्वाप्रसिद्धेरितिचेन्न विषयितयाऽव्याप्यव्यापकभावानभ्युपगमएवैतल्लक्षणप्रणयनमित्यभ्युपगमात् । प्रतियोगितायां साध्यसाध्यसमानियतान्यतरनिरूपितत्वस्य वा विवक्षितत्वात्साध्यसामनैयत्यं स्वरूपेणेति साध्यसमनियतातिरिक्ताभावनिरूपितत्वस्य सत्त्वान्नको ऽपिदोषः पदमादधाति ।

अत्रेदमवधेयम् । साध्याभावत्वावच्छिन्न साध्याभावत्वसमनियतम्वा यत्प्रतियोगित्वं साध्यसामान्यनिरूपितं तद्विशिष्टसाध्याभावत्वावच्छिन्ननिरूपकताविवक्षणीया वैशिष्ट्यञ्चस्वावच्छेदकसम्बन्धावच्छिन्नत्व स्वसामानाधिकरण्योभयसम्बन्धेन एवञ्च घटभेदाभावस्य घटत्वरूपस्य तादात्म्येन घटत्वे घटरूपस्प समवायेन कपाले सत्त्वेऽपि तत्तत्सम्बन्धावच्छिन्नततन्निष्ठनिरूपकतायास्तादृश्यासमवायावच्छिन्नघटत्वनिष्ठप्रतियोगितया तादात्म्यावच्छिन्नघटनिष्ठप्रतियोगितया वा ऽविशिष्टत्वाद् घभिन्नङ्कपालत्वाद् घटत्वत्वाद्वेत्यादौ नाव्याप्तिः तथासत्यत्यन्ताभावत्वनिरूपितत्वस्यापि प्रयोजनविरहेणानिवेशनीयतया समवायेनघटभेदाभावाभावस्य घटभेदास्वरूपत्वेऽपि घटात्मकसाध्याभावनिष्ठभेदीयप्रतियोगितामादायैव घटभेदसाध्यकस्थले लक्षणसङ्गतिः अत्रनिरूपकतायां साध्याभावत्वावच्छिन्नत्वप्रवेशाद्विशिष्टसत्ताभाववान्गुणत्वादित्यत्र सत्ताभावाभावत्वावच्छिन्ननिरूपकत्वमादाय नदोषः अथ महानसीयवन्ह्यभावाद्यवच्छिन्ननिरूपकतायांसाध्यनिरूपितवह्निसामान्याभावनिष्ठप्रतियोगित्वसामानाधिकरण्याविरहेणाव्याप्त्यसम्भवान्निरूपकतायांविवक्षितसाध्याभावत्वावच्छिन्नत्वन्नप्रवशनीयमिति चेन्निरूपकभेदेन निरुपकतायास्तादृशनिरुपकतानिरूपितत्वेनचाधिकरणताया भिन्नत्वेन प्रवेशनीयम् । प्रतियोगितायान्तत्प्रवेशादेव प्रयोजनस्य वृत्तत्वात् निरूपकतायानिरूपकभेदेन भेदाभावं तु वह्निसामान्याभावसाधारणवह्निनिष्ठप्रतियोगिताकभावत्वावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वावच्छिन्ननिरूपकत्वादिकमादायाव्याप्तिवारणाय साध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वनिष्ठावच्छेदकतानिरूपित प्रतियोगित्वनिष्ठावच्छेदकतानिरूपितनिरूपकत्वं प्रवेशनीयमेव ।

यदिचैवं सति घटभेदाभावत्वावच्छिन्नतादात्म्याद्यवच्छिन्नघट-

घटत्वसाधारणैकनिरूपकतामादाय घटभिन्नं घटत्वत्वादित्यादावव्याप्तितादवस्थ्यमिति वाच्यं घटे घटत्वत्वरूपत्वाद्घटत्वे च घटत्वत्वस्वरूपत्वाद्घटभेदाभावत्वरूपानुयोगितायाः उभयत्रैक्यस्वीकृत्याभावत्वव्याप्यानुयोगितावच्छिन्नत्वं प्रतियोगितायां निरूपकतायाश्च निवेशनीयम् उभयावृत्तिधर्म्मावच्छिन्नत्वस्वावाच्यमेवञ्च वह्निमान्धूमादित्यादौ पूर्वोक्तयुक्त्या दोषाभावेन उक्तरीत्या निरूपकत्वप्रवेशो न कार्य्यः किन्त्वनुयोगिताविशेषावच्छिन्ननिरूपकतायाम्विशिष्टसत्ताभाववान् गुणत्वादित्यत्राव्याप्तिवारणाय साध्यानिष्ठप्रतियोगितानिरूपकत्वावच्छिन्नत्वं प्रवेशनीयमिति विभाव्यते तदाऽनुयोगित्वविशेषावच्छिन्नत्वप्रवेशार्थमेव तादृशनिरूपकतोक्तिरिति सामानाधिकरण्यानुयोगित्वविशेषावच्छिन्नत्वेऽप्रवेश्य स्वावच्छेदकावच्छिन्नत्वस्य प्रवेशकृते न वैयर्थ्यशङ्कापीति द्रष्टव्यम् ॥

साध्यसामान्यीयत्वाप्रवेशे हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावनिवेशस्य वक्ष्यमाणस्यानुसन्धाने समवायेन प्रमेयसाध्यकज्ञानत्वादिहेतुकस्थले कालिकसम्बन्धावच्छिन्नसाध्याभावाभावस्यापि साध्यरूपतया तत्प्रतियोगितावच्छेदककालिकमादायाप्यव्याप्तिः वक्ष्यमाणस्याननुसन्धाने तु समवायेन प्रमेयसाध्यकद्रव्यत्वप्रकारकप्रमाविशेष्यत्वादिहेतावव्याप्तिर्बोध्या अथसाध्यसामान्यीयत्वञ्च स्वानिरूपकयावत्साध्यकत्वस्वानिरूपकयत्किञ्चित्साध्यकभिन्नत्वन्तदपेक्षया साध्ये साध्यतावच्छेदकसम्बन्धेनवृत्तित्वस्य लघुतया तदेव विवक्षणीयं कालिकसम्बन्धावच्छिन्न साध्याभावाभावस्यातिरिक्तस्य समवायेनावृत्तित्वादिति चेन्न कालिकेन प्रमेयस्य साध्यतायां जन्यत्वादिहेतावव्याप्त्यापत्तेः कालिकसम्बन्धावच्छिन्नसाध्याभावस्यापि कालिकेन वृत्तित्वादित्यलम्पल्लवितेन ॥ ० ॥

ननु साध्याभावाधिकरणनिरूपिताभाव एव व्याप्तिरस्तु किं वृत्तितात्व प्रवेशेनेति चेन्न वह्न्यभावाधिकरणधूमावच्छिन्नप्रतियोगितानिरूपितावच्छेदकत्वस्य धूमे सत्त्वेनाव्याप्त्यापत्तेः नच हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य विवक्षितत्वेन नाव्याप्तिसम्भव इति वाच्यम् तत्सम्बन्धावच्छिन्ना-

धेयतत्संसर्गीयप्रतियोगितयोगिरेकतयासाध्याभावाधिकरणसंयोग-
प्रतियोगित्वमादायऽव्याप्त्यापत्तेः । वृत्तितात्वानवच्छिन्नप्रतियोगिक-
स्वरूपसम्बन्धावच्छिन्नप्रतियोगितानिवेशेसाध्याभावाधिकरणनि-
रूपितत्वावच्छिन्नस्यतत्सम्बन्धस्यव्यधिकरणत्वेनतत्सम्बन्धावच्छिन्न
तदभावस्यकेवलान्वयित्वेनव्यभिचारिमात्रेऽतिव्याप्त्यापत्तेः वृत्तिता
त्वोपादाने तु साध्याभावाधिकरणतावच्छेदकधर्म्मावच्छि-
न्ननिरूप्यतानिरूपित निरूपकतावद्वृत्तितात्वावच्छिन्नाभावस्यनिवे-
शेन दोषाभावादिति अथैवमपि साध्याभावाधिकरणधूमाधिकरणता-
निरूपितवृत्तित्वस्यैवहेतौसत्त्वेनाव्याप्तिः नचाधिकरणताभिन्नत्वम-
धिकरणविशेषणमधिकरणताभिन्नं धूमादित्यत्राव्याप्तेः नापि हेत्वधि-
करणताभिन्नत्वंधूमाधिकरणताभिन्नंधूमादित्यत्रदोषात् नापि साध्या-
भावाधिकरणनिष्ठाधिकरणतानिरूपितवृत्तित्वस्य लक्षणघटकतास-
म्भवः । उक्तदोषवारणेऽपि घटाभिन्नमधिकरणतात्वादित्यत्र घटनिष्ठा-
धिकरणत्वस्याधिकरणतात्वाधिकरणत्वेनाधिकरणतानिरूपितवृत्ति-
त्वस्यैव हेतौसत्त्वेनाव्याप्त्यापत्तेः यद्यप्युक्ताधिकरणताविशिष्टवृत्ति-
त्वस्य लक्षणघटकत्वे नोक्तदोषः वैशिष्ट्यञ्च स्वनिरूपितत्वस्वा-
श्रयनिरूपितत्वोभयसम्बन्धेन तथाप्यवच्छेदकताभिन्नमधिकरणता-
त्वादित्यत्राधिकरणतात्वनिष्ठवृत्तितायास्स्वावच्छिन्नत्वेनावच्छेदकता-
त्मकसाध्याभावाधिकरणनिरूपितत्वस्य तन्निष्ठाधिकरणतया अ-
धिकरणतात्वाधिकरणत्वेन तन्निरूपितत्वस्य च सत्त्वेनाव्याप्त्यापत्ति-
र्दुरुद्धरेति उक्ताधिकरणतावैशिष्ट्यं स्वनिरूपितत्वस्वनिष्ठाधिकर-
णत्वानिरूपितत्वोभयसम्बन्धेन वाच्यम् एवञ्च नप्रागुक्तदोषाणाम-
वकाशः अधिकरणतात्वनिष्ठ वृत्तितायामधिकरणतानिष्ठाधिकरण-
तानिष्ठाधिकरणतानिरूपितानिरूपितत्वस्य सत्त्वात् । नचैवमप्यवच्छे-
दकताभिन्नंवाच्यत्वादित्यादित्यादावतिव्याप्तिः । वाच्यत्वस्यकेवलान्व-
यित्वेनाधिकरणतानिष्ठाधिकरणत्वेऽपिसत्त्वेनतन्निष्ठवृत्तितायांस्वनिष्ठा-
धिकरणत्वानिरूपितत्वविरहादितिवाच्यं वृत्तितायानिरूपकभेदेनभि-
न्नतया साध्याभावाधिकरणावच्छेदकतानिरूपितवृत्तितायां वा-
च्यत्वनिष्ठायामवच्छेदकतानिष्ठाधिकरणतानिष्ठाधिकरणतानिरूपित-
त्वस्य सत्त्वात् यद्वा साध्याभावाधिकरणतावच्छेदकधर्म्मविशिष्टत्वं
वृत्तित्वे विवक्षणीयम् वैशिष्ट्यञ्च स्वावच्छिन्ननिरूपकतानिरूपितनि-

प्यत्वावच्छेद्यस्वावच्छिन्नाधिकरणतात्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यतावत्त्वसम्बन्धेन तथाचावच्छेदकत्वस्य अधिकरणतात्वानाधिकरणत्वेनावच्छेदकतात्वावच्छिन्नाधिकरणतात्वावच्छेद्यनिरूपकतानिरूपितनिरूप्यताया अवच्छेदकतात्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यत्वानवच्छेद्यत्वात् ।

यतु साध्याभावाधिकरणवृत्तिवृत्तित्वाभावोऽव्याप्तिः वृत्तिता च स्वविशिष्टनिरूपकताकाधिकरणतावत्त्वसम्बन्धेन वैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्व स्वावच्छेदकावच्छिन्नत्वोभयसम्बन्धेन तथा च न प्रागुक्तदोषाणामवकाशइति तन्न चारु साध्याभावाधिकरणनिष्ठाधिकरणतानिरूपितनिरूपकत्वाभावस्यैव लक्षणत्वसम्भवे तत्परित्यागस्यानौचित्यात् । एवं सत्युक्ताधिकरणताविशिष्टाभावस्यैव व्याप्तित्वमस्तु पुनर्वृत्तितात्वेनतत्प्रवेशो व्यर्थ एवेति चेदत्रोच्यते साक्षान्निरूपितत्वस्य दुर्निवेशतया साक्षात्परम्परासाधारणन्तद्वाच्यं तथाच साध्याभावाधिकरणनिष्ठधूमावच्छिन्ननिरूपकताकाधिकरणतानिरूपितधूमत्वावच्छिन्नावच्छेदकत्वस्यावच्छेदकत्वाधयेत्वयोरवच्छेदकाधेयरूपत्वेनैक्यतया धूमत्वावच्छिन्नवृत्तितारूपस्य हेतौ सत्त्वेनाव्याप्त्यापत्त्या स्वनिष्ठनिरूपकतानिरूपिताधयेतात्वावच्छिन्ननिरूप्यत्वस्य संसर्गताया वाच्यतया तल्लाभार्थमेवाधेयतात्वेन प्रवेश इति यदि च साध्याभावाधिकरणनिष्ठाधिकरणतानिरूपितनिरूपकत्वाभाव उक्तलक्षणस्य पर्य्यवसानं तदा न वैयर्थ्यशङ्कापि निरूपकतात्वेनाप्रवेशे घटभिन्नमधिकरणतात्वादित्यत्र घटनिष्ठाधिकरणतानिरूपितवृत्तित्वस्याधिकरणतात्वे सत्त्वेनाव्यप्त्यापत्तेरितिदिक् ॥

अथ साध्याभावाधिकरणनिरूपितवृत्तितात्वावच्छिन्नप्रतियोगितानिरूपकवत्त्वमेवास्तु लक्षणमभावत्वेन प्रवेशो व्यर्थ इति चेन्न घटवृत्तिताभिन्नं वृत्तितात्वादित्यत्राव्याप्त्यापत्तेः उक्तप्रतियोगिताकावच्छेदकत्वस्य वृत्तितात्वे सत्त्वात् । नचावच्छेदकत्वस्याप्यवच्छेदकत्वाभावाभावत्वेनाभावतयाऽतिव्याप्तितादवस्थ्यमिति वाच्यम् अभावत्वस्य भावभेदरूपतयाऽवच्छेदकत्वे तद्विरहात् तादृशप्रतियोगितात्वावच्छिन्ननिरूप्यतानिरूपिताभावत्वावच्छिन्ननिरूपकतावतएवव्याप्तित्वाद्वा एवञ्चप्रतियोगित्वाभावाभावस्यप्रतियोगितारूपतया तन्निरूपितप्रतियोगित्वस्योक्तप्रतियोगित्वाभावे सत्त्वेऽपि वह्निमान्वह्न्यभावाधिकर-

णनिरूपितवृत्तित्तात्वावच्छिन्नप्रतियोगित्वाभावादित्यत्र नातिव्याप्तिः ।

केचित्तुक्तस्थलेऽभावत्वेनाप्रवेशेऽपि प्रतियोगितानिरूपकत्वेनप्रवेशादेव नातिव्याप्तिः प्रतियोगित्वस्याभावनिरूपकत्वाभावादित्यपि वदन्तीति वृत्तित्वाभावस्य व्याप्तित्वञ्च स्वरूपेण बोध्यं तेन क्रियात्मक हेतौ व्यभिचारिणि नातिप्रसङ्ग इति ॥

ननु सत्तावान् जातेरित्यत्र सत्ताभाववत्समवेतत्वाप्रसिद्ध्या द्रव्यं विशिष्टसत्त्वादित्यत्र विशिष्टसत्त्वे सत्तानतिरेकेण द्रव्यत्वाभाववद्वृत्तित्वस्य सत्त्वेन चाव्याप्त्यपत्तिरिति चेन्न प्रकृत हेतुतावच्छेदकावच्छिन्ननिरूपकताकाधिकरणत्वीयहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तिताप्रतियोगिकस्वरूपेण वृत्तित्वाभावस्य विवक्षितत्वात् सत्ताभावाधिकरणनिरूपितस्वरूपसम्बन्धावच्छिन्नवृत्तित्वस्य प्रासिद्धेः विशिष्टसत्तात्वावच्छिन्नाधिकरणत्वीयवृत्तिताप्रातियोगिकस्वरूपेण सत्तात्वावच्छिन्नवृत्तित्वस्यासत्त्वाच्च दोषाभावात् हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वञ्च यदि हेतुतानिरूपितसंसर्गतावच्छेदकावच्छिन्नसंसर्गतानिरूपितत्वं तदा धूमसाध्यके महानसीयसंयोगेन वह्नौ संयोगसम्बन्धावच्छिन्नवृत्तित्वस्य साध्याभाववन्निरूपितस्योक्तसम्बन्धेन हेतौ सत्त्वे नाव्याप्त्यापत्तेः नचोक्तवृत्तित्वाभावान्तर्गतमहानसीयसंयोगसम्बन्धवच्छिन्नवृत्तित्वघटिताभावस्य हेतौ सत्त्वेन नाव्याप्तिरितिवाच्यम् धूमवान्वह्नेरित्यत्र तद्वह्नीयसंयोगसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपेणोक्तवृत्तित्वाभावस्य वह्नौ सत्त्वेनातिव्याप्त्या हेतुतानिरूपितसंसर्गतावच्छेदकतासमानाधिकरणाधेयत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेदकत्वानिष्ठावच्छेदकतानिरूपितसंसर्गत्वानिष्ठावच्छेदकतानिरूपिताधेयत्वनिष्ठप्रतियोगित्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितस्वरूपत्वनिष्ठावच्छेदकतानिरूपितसंसर्गताकप्रतियोगिताकाभावत्वेन निवेशस्याशक्यतयोक्ताधेयत्वसम्बन्धावच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वादिघटितरूपेणैव संसर्गताया निवेशनीयतयोक्ताव्याप्तितादवस्थ्यादतो हेतुतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकत्वानिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितसंसर्गतानिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितवृत्तितानिष्ठावच्छेदकताभिन्नस्वरूपत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपि तत्वेनैवसं-

संसर्गतानिवेशनीयेति न दोषः उक्तावच्छेदकताकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वनिवेशात्संयोगत्वगतैकत्वावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकतानिरूपितघटप्रतियोगिकत्वनिष्ठावच्छेदकतानिरूपितसंसर्गताकवृत्तित्वीयस्वरूपसम्बन्धमादाय धूमवान् वह्नेरित्यत्र नातिव्याप्तिः यद्वा हेतुतानिरूपितसंसर्गतावच्छेदकतासमानाधिकरणाधेयत्वसम्बन्धावच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपितावच्छेदकत्वानिष्ठावच्छेदकत्वादिघटितरूपेण संसर्गत्वप्रवेशे न कोऽपि दोषः महानसीयसंयोगेन सद्धेतौ महानसीयत्वनिष्ठावच्छेदकत्वसंयोगत्वनिष्ठावच्छेदकत्वयोर्द्वयोरेव हेतुतानिरूपितसंसर्गतावच्छेदकत्वसमानाधिकरणत्वेनोक्तावच्छेदकत्वसमानाधिकरणावच्छेदकत्वादस्योभयत्र विरहेण महनासीयत्वनिष्ठावच्छेदकतानिरूपितसंयोगत्वनिष्ठावच्छेदकतानिरूपितसंसर्गताकवृत्तित्वीयस्वरूपत्वावच्छिन्नसंसर्गताया अपि तादृशत्वेन तन्निरूपकप्रतियोगिताकाभावस्य हेतौ सत्त्वाल्लक्षणसमन्वयः घटीयत्वनिष्ठावच्छेदकताया उक्तावच्छेदकतासमानाधिकरणत्वविरहेण तन्निष्ठावच्छेदकताकसंसर्गतामादाय न दोष इति ॥

अत्र प्रथमउक्तरूपावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकतानिष्ठावच्छेदकतात्वावच्छिन्नसामान्यभेदए व निवेशनीयः अन्यथैकावच्छेदकताभेदस्यापरावच्छेदकतायां सत्त्वेनावच्छेदकताद्वयनिरूपितसंसर्गताघटितसंसर्गताया लक्षणाघटकत्वेन महानसीयसंयोगेन सद्धेतावव्याप्त्यापत्तेः। अतएव द्वितीयेऽपि हेतुतानिरूपितसंसर्गतावच्छेदकतासमानाधिकरणावच्छेदकतात्वावच्छिन्नसामान्यभेदस्तादृशावच्छेदकत्वनिष्ठावच्छेदकतासामान्यभेदश्च निवेश्यस्तदपेक्षयालाघवेन हेतुतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसमानाधिकरणाधेयत्वसम्बन्धावच्छिन्नावच्छेदकताभिन्नाधेयसम्बन्धावच्छिन्नावच्छेदकतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकभेदत्वेनतद्व्यक्तिनिष्ठावच्छेदकताभेदान्निवेश्य तद्व्यक्तिनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितसंसर्गतानिष्ठावच्छेदकत्वादिघटितरूपेण संसर्गता निवेश्या आधेयताच स्वावच्छेदकताप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धावच्छिन्नैवेतरवारकप्रवेशे प्रयोजनविरहात् उक्तपरम्परायाः संसर्गत्वाभावेतूकरीत्यानिव-

शस्याशक्यतया गुरुभूतोऽपि द्वितीयकल्प आदरणीयः एवमेव हेतुतावच्छेदकावच्छिन्नत्वमपि परिष्कृतम्बोध्यम् निरूपकतावच्छेदकताया इतरवारकंपर्य्याप्तिनिवेशे प्रयोजनाभावादिति ॥

यदिच वह्निज्ञानत्वसाध्यके प्रकारितया वह्निहेतुकस्थले वह्नित्वगतैकत्वावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकानिरूपकतात्वस्य महानसीयत्ववह्नित्वगतद्वित्ववृत्तिनिरूपकतायामपि सत्त्वेन तन्निरूपिताधिकरणताकवृत्तित्वीयस्वरूपेण साध्याभावाधिकरणनिरूपितमहानसीयवह्नित्वाद्यवच्छिन्नवृत्तित्वस्य वह्निमात्रेसत्त्वादव्याप्तिर्व्विषयितया हेतुहेतुमद्भावेनच प्रकारितया महानसीयवह्निविषयकज्ञाने कुतो न वह्नेस्सत्त्वं वह्नित्वेतरधर्म्मानवच्छिन्नानिरूपितप्रकारितया हेतुत्वेन तेन सम्बन्धेन महानसीयवह्नेस्सत्त्वामिति कुतो वा व्याप्तिरितिवाच्यं संसर्गता हि यद्यपि,प्रकारितात्वेनैव तथापि वह्नित्वविशिष्टसंसर्गो वह्नित्वेतरधर्म्मावच्छिन्नानिरूपितप्रकारितैव महानसीयवह्निविषयकज्ञानं प्रकारितयावह्निमदित्यप्रत्ययात् महानसीयवह्निमदितिज्ञानानन्तरंवह्निज्ञानामीत्यनुव्यवसायाभावाच्चेति,विभाव्यते तदा हेतुतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपे स्वावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन वृत्तित्वमेवनिरूपकतायामुपादेयम्॥

अथोक्तरूपवृतिनिरूपकतानिरूपितत्वेनैवाधिकरणतोपादेया अधिकरणतात्वेनतत्प्रवेशो व्यर्थ इति चेत्तस्य स्वनिरूपितत्वस्वनिष्ठाधिकरणतानिरूपितत्वोभयसम्बन्धेनाधिकरणताविशिष्टवृत्तित्वलाभार्थत्वान्न वैयर्थ्यमिति गृहाण नचोक्ताविशिष्टवृत्तित्वोपादाने प्रयोजनाभावः वह्निमान् पर्वतवृत्तित्वविशिष्टवाच्यत्वादित्यत्र साध्याभावाधिकरणस्वरूपत्वावच्छिन्नसंसर्गतानिरूपितत्वावच्छिन्नवृत्तिताया उक्तनिरूपकतानिरूपितसंसर्गतानिरूपितवाच्यत्वत्वावच्छिन्नवृत्तित्वीयस्वरूपेण हेतौ सत्त्वादव्याप्तेर्वारकस्यैव प्रयोजनत्वात् नच स्वनिष्ठाधिकरणत्वानिरूपितत्वमनिवेश्यमितिवाच्यम् साध्याभावाधिकरणोक्ताधिकरणतात्मकाधिकरणानिरूपितवाच्यत्वत्वावच्छिन्नवृत्तितामादायाव्याप्तितादवस्थ्यादिति ॥

यत्तु वृत्तितात्वेनवृत्तित्वमनोपादेयं प्रयोजनाभावादिति तन्न द्रव्यत्वसाध्यके समवायेन प्रमेयविशिष्टस्य समवायेन हेतुतायां सद्धेतौ हेतुतावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणताविशिष्टप्रमेयत्वा-

वच्छिन्नावच्छेदकतायाः स्वावच्छेदकप्रमेयत्वरूपयोः प्रमेयत्वात्मक-प्रमेयत्वावच्छिन्नवृत्तितात्मकत्वेन तत्प्रातियोगिकस्वरूपेण साध्याभावाधिकरणनिरूपितप्रमेयत्वावच्छिन्नसमवायसम्बन्धावच्छिन्नवृत्तित्वस्यैव सत्त्वादव्याप्त्यापत्तेः वृत्तितात्वेन तत्प्रवेशे तु स्वनिष्ठनिरूपकतानिरूपितवृत्तितात्वावच्छिन्ननिरूप्यत्वस्य संसर्गतालाभेन प्रमेयावच्छिन्नवृत्तितायामेवाधिकरणताविशिष्टत्वसत्त्वेन नाव्याप्तिसम्भव इति यद्यप्यत्रहेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्ननिरूपकत्वीयस्वरूपेण साध्याभावाधिकरणनिष्ठाधिकरणतानिरूपितनिरूपकत्वाभावस्य लघुतरस्य व्याप्तित्वं सम्भवति तथापियथाश्रुतमूलानुरोधात्तदुपेक्षितम् ॥

ननु कालिकसम्बन्धावच्छिन्नधूमत्वनिष्ठावच्छेदकताकवृत्तित्वीयस्वरूपेण वह्न्यभावाधिकरणनिरूपितवृत्तित्वस्य धूमे सत्त्वादव्याप्तिः हेतुतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताविवक्षयोक्तदोषवारणेऽपि महानसीयवह्निसाध्यके समवायेन महानसीयत्वविशिष्टत्वेसाते कालिकेन धूमत्वविशिष्टहेतुकेऽव्याप्त्यापत्तिःकालिकसम्बन्धावच्छिन्नमहासीयत्वनिष्ठावच्छेदकतानिरूपितसमवायसम्बन्धावच्छिन्नधूमत्वनिष्ठावच्छेदकताकवृत्तिताया हेतौ सत्त्वादिति चेन्न वृत्तितायाः आश्रयभेदेन भिन्नतया धूमस्य कालिकेन धूमत्वाश्रयत्वेऽपि संयोगेन धूमस्य ह्रदावृत्तित्वानपायात् एतदभिप्रायेणैव विशिष्टसत्त्वस्य स्वावच्छिन्नाधिकरणत्वेनैव द्रव्यत्वव्याप्यत्वं स्वीकृत्य हेतुतावच्छेदकावच्छिन्नाधिकरणत्वप्रवेशनम्विफलमाकलय्य हेतुतावच्छेदकाघटितस्य व्याप्तिरूपत्वस्वीकारो ग्रन्थान्तरे पर्य्यालोचनीयः अन्यथा हेतुतावच्छेदकाप्रवेशे प्रमेयत्वाद्यवच्छिन्नवृत्तितामादायासम्भवापत्तेरिति वृत्तिताया एकधर्म्मावच्छिन्नाया यावत्स्वावच्छेदकाश्रयेष्वेकत्वे तु हेतुतावच्छेकताविशिष्टावच्छेदकतानिरूपितत्वादिरुपंहेतुतावच्छेदकावच्छिन्नत्वम्वाच्यं। वैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वसामानाधिकरण्योभयसम्बन्धेन अधिकन्तु साध्यतावच्छेद...च्छिन्नत्वविचारवदनुसन्धेयमित्यलम् ॥

अथधूमवानवह्नेरित्यत्रातिव्याप्तिः। निरुक्तवृत्तित्वाभावस्य पर्व्वतीयवह्न्यादौ सत्त्वादिति चेन्नअनुपदोक्तवृत्तितैक्यपक्षे दोषस्यासम्भवात्पक्षान्तरे तत्रोक्ताभावस्य सत्त्वेऽपि तस्य लक्ष्यत्वमेवेत्यन्ये वह्नित्वे-

नालक्ष्यत्वेऽपि हेतुतावच्छेदकावच्छेद्यत्वविशिष्टोक्तवृत्तित्वाभावस्यैव व्याप्तित्वस्वीकाराददोष इत्यपरे यथोक्तविवक्षायां गौरवेऽपि तादृशवृत्तितानवच्छेदकप्रकृतहेतुतावच्छेदकस्य व्याप्तित्वावलम्बने नातिव्याप्तिरिति केचित् साध्याभावाधिकरणावृत्तिहेतुतावच्छेदकसम्बन्धावच्छिस्वावच्छिन्नाधिकरणताकधर्म्मवत्त्वम्विवक्षणीयमेवञ्च सत्तावाञ्जातेरित्यादावपि नाव्याप्तिरितिग्रन्थान्तर इति ॥

दीधितावव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्येति अत्र निरवच्छिन्नसाध्याभावाधिकरणत्वविवक्षणेऽव्याप्यवृत्तिसाध्यकस्थलेऽव्याप्त्यभावादाशङ्केति नच कपिसंयोगाभाववान्गुणत्वादित्यत्राव्याप्तिःनिरवच्छिन्नाधिकरणत्वस्यसाध्याभावनिरूपितस्याप्रसिद्धेरितिवाच्यं तस्य केवलान्वयिसाध्यकत्वेन तत्राव्याप्तेरिष्टत्वात् कपिसंयोगवद्भेदस्याव्याप्यवृत्तित्वे केवलान्वयित्वमेव व्याप्यवृत्तित्वे तद्भावस्य कपिसंयोगरूपत्वाभावेन तन्निरूपितनिरवच्छिन्नाधिकरणत्वस्य सम्भवेन कपिसंयोगवद्भेदसाध्यकेऽपि नाव्याप्तिसम्भवः नचैवमपि कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वाभावस्य स्वरूपेण साध्यतायामात्मत्वहेतौ साध्याभावस्य कालिकेन निरवच्छिन्नाधिकरणत्वाप्रसिद्धिरिति वाच्यं सावच्छिन्नत्वहेतुमन्निष्ठत्वोभयाभाववत्त्वस्याधिकरणातायाम्विवक्षितत्वात् यद्वा सावच्छिन्ननरिवच्छिन्नकेवलान्वयितावच्छेदकानवच्छिन्नवृत्तितानिरूपितसंसर्गतावच्छेदकानवच्छिन्नसंसर्गताकनिरूपकताकाधिकरणताभिन्नत्वोभयाभाववत्त्वम्विवक्षणीयं कालिकसम्बन्धावच्छिन्नवृत्तितामात्रस्य सावच्छिन्नत्वात् कालिकसम्बन्धावच्छिन्नप्रमेयत्वावच्छिन्नवृत्तिताया निरवच्छिन्नत्वानुभवात् केवलान्वयितावच्छेदकानवच्छिन्नेत्युक्तम् अत एव टीकान्तरे प्रागुक्तोभयाभावस्य कपिसंयोगवद्भेदाभावत्वावच्छिन्नाधिकरणतायां सत्त्वेन निरवच्छिन्नाधिकरणत्वाप्रसिद्धिनिवन्धनाव्याप्तिशङ्काऽसङ्गतिरपिनिरस्तेतिदिक् ॥ ० ॥

उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयस्याभ्यर्हितत्वेन तस्यैव विवक्षितत्वमालोक्याह नचकपिसंयोगाभाववानित्यादि आदिपदाद्गुणवान् जलीयपरमाणुरूपाद्घटत्वताद्विरुद्धसंयोगान्यतरवान् घटीयरूपादित्यादिपरिग्रहः तेन सद्धेतावित्यत्र सत्पदस्य सत्तावदर्थकत्वेऽपि व्याप्यवृत्तिसाध्यकेत्यस्याव्याप्यवृत्तिभावसाध्यकार्थकेत्वेपि च

न क्षतिः ननु कार्थकाव्याप्यवृत्तिसाध्यकसद्धेतुत्वावच्छेदेनोक्तलक्षणासत्त्वमाशङ्क्योत्तरलक्षणावतारे तल्लक्षणस्योक्तावच्छेदकावच्छेदेन सत्त्वएवसंगतिः नच तत्संभवति तद्धर्मस्य तत्संयोगीगुणादित्यव्यभिचारिण्यपि सत्त्वेन तत्राग्रिमलक्षणस्याप्यसत्त्वात्। नच व्याप्तिपदस्य सद्धेतावेव लक्षणासत्त्वार्थकत्वेन तत्समभिव्याहारवशात् स्वाधिकरणवृत्त्यभावप्रतियोगितावच्छेदकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकसद्धेतुत्वावच्छेदेनैव लक्षणासत्त्वार्थकत्वस्योक्तवाक्येस्वीकरणीयतया नासङ्गतिरिति वाच्यं कपिसंयोगाभाववान् गुणादित्यादिस्थलीयहेतावप्युक्तसद्धेतुत्वस्य सत्त्वेन तत्राग्रिमलक्षणस्यासत्त्वादसङ्गतेस्तदवस्थानादितिचेन्न द्वितीयलक्षणस्य तादृशसद्धेतुत्वावच्छेदेन विरहस्या सत्त्वेन तादृशनियमभङ्गरुपाभ्यर्हितत्वमङ्गीकृत्य लक्षणान्तरावातारणएवतात्पर्यस्वीकारेऽसंगतिविरहात्। अव्याप्यवृत्तिसाध्यकसद्धेतुपदेनभेदप्रतियोगितावच्छेदकातावच्छेदकतादृशसाध्यतावच्छेदकावच्छिन्नसाध्यकसद्धेतोर्विवक्षितत्वात्। स्वप्रतियोग्यनधिकरणवृत्त्यभावप्रतियोग्यव्याप्यवृत्ति साध्यकसद्धेत्वर्थकत्वस्योक्तपदस्यवा विवक्षितत्वात् यद्वा निरवच्छिन्नवृत्तिकभिन्नत्वमव्याप्यवृत्तित्वं तथाचाव्याप्यवृत्ति साध्यं यस्येत्येवविग्रह आदरणीयः एवञ्च सद्धेतावित्यत्र सन्हेतुरिति कर्मधारय एवेतिन काश्चिद्दोषः॥ केचित्तु स्वप्रतियोगित्वस्वसामानाधिकरण्यस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वैतत्तृतयसम्बन्धेनाभावविशिष्टत्वमव्याप्यवृत्तित्वम् कपिसंयोगाभावस्य न कपिसंयेगवन्निष्ठभेदप्रतियोगितावच्छेदकत्वमिति तस्य स्वसामानाधिकरण्यस्वप्रतियोगित्वयोर्निवेशादारमत्वादेश्च न व्याप्यवृत्तित्वप्रसङ्ग इति प्राहुः॥०"

मूले केवलान्वयीन्यभावादिति अथ स्वावच्छिन्नाभाववद्वृत्तित्वसम्बन्धावच्छिन्नसाध्यतावच्छेदकाभाववत्त्वमेव व्याप्ति रस्तु तावतैव वाच्यं ज्ञेयत्वादित्यादिकेवलान्वयिनि नाव्याप्तिर्वाच्यत्वत्वस्योक्तसम्बन्धस्य व्यधिकरणत्वादिति चेन्न वृत्तिनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वे धनी चैत्रत्वादित्यादावव्याप्तेः वृत्तिनियामकसम्बन्धाघटितस्वावच्छिन्नाभाववद्वृत्तित्वस्य वृत्तिनियामकत्वेपि वृत्त्यनियामकसम्बन्धघटितस्य वृत्त्यानियामकतया वृक्षः सिंसपाया इत्यत्राव्याप्तेश्च।

यदि च वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वे सा-
ध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नसम्बन्धित्वा-
भाववद्धेतुतावच्छेदकसम्बन्धावच्छिन्नसम्बन्धितावच्छेदकप्रकृतहेतु-
तावच्छेदकस्यैव वा व्याप्तित्वे न दोषः अभावश्चस्वरूपसम्बन्धावच्छि-
न्नस्वाभाववन्निरूपितस्वरूपसम्बन्धावच्छिन्नवृत्तित्वसम्बन्धावच्छिन्न
प्रतियोगिताक इति । एतेन स्ववृत्तिवाच्यत्ववत्त्वसम्बन्धेन घटादि-
साध्यकस्थले व्याप्तिः तत्सम्बन्धावच्छिन्नाभावस्याप्रसिद्धत्वादिति
निरस्तम् स्वरूपसम्बन्धावच्छिन्नाभावस्य प्रसिद्धेरिति विभाव्यते
तदात्रकेचित्सम्बन्धितायानानात्वे धूमवान् वह्नेरित्यत्रातिव्याप्तिः पर्व-
तीयवह्न्यादिसम्बन्धिताया उक्तसम्बन्धित्वाभाववत्त्वेन तदवच्छेदक-
त्वस्य वह्नित्वे सत्त्वात् यद्धर्म्मावच्छिन्नसम्बन्धित्वत्वावच्छेदेनोक्त-
सम्बन्धित्वाभाववत्त्वविवक्षणे उक्तदोषवारणेऽप्युक्तसम्बन्धितात्वावच्छे-
द्यत्वस्य व्यापकतारूपत्वेन सिद्धान्तलक्षणापेक्षया लघुत्वाभावः अ-
व्यभिचरितत्वस्य पारिभाषिकत्वापत्तेः उक्तस्य व्यभिचारज्ञानाप्रति-
बध्यत्वेन व्याप्तिरूपत्वासम्भवश्चेति वदन्ति तन्न चारु स्वाभाववन्नि-
रूपितसम्बन्धितावच्छेदकत्वसम्बन्धावच्छिन्नोक्तसम्बन्धित्वाभावव-
द्धेतुतावच्छेदकस्यव्याप्तित्वेउक्तातिव्याप्त्यसम्भवात् एवमुक्तपारिभाषिक-
त्वस्य नदोषत्वमन्यथा द्रव्यं विशिष्टसत्त्वादित्यादिस्थलीयाव्याप्तिवा-
रणायोक्तस्य लक्षणस्य पारिभाषिकार्थकत्वेनहेयत्वमापद्येत साध्या-
भाववद्वृत्तित्वस्यैव व्यभिचारत्वे समानप्रकारत्वादिनैव प्रतिबन्धक-
त्वे च सिद्धान्तव्याप्तेरपि तदप्रतिबध्यतयाऽव्याप्तित्वप्रसङ्गः नन्न हेतु-
समानाधिकरणाभावप्रतियोगितावच्छेदकत्वमपि व्यभिचार इति ने-
दोष इति वाच्यं प्रतियोगिताधार्म्मिकोभयाभावघटितकल्पस्य सिद्धा-
न्तत्वेन तज्ज्ञानस्योक्तव्यभिचारज्ञानप्रातिवध्यत्वाविरहात् यदि मणिम-
न्त्रादिन्यायेनोक्तव्याप्तिज्ञानस्याप्युक्तव्यभिचारज्ञानप्रातिवध्यत्वं तदा-
प्रकृतव्याप्तिज्ञानस्यापितत्त्वं सुघटमेव तादृशव्याप्तिज्ञानाविरोधिज्ञानवि-
षयव्यभिचारकल्पना च प्रकृतेऽपि समेति

अत्रब्रूमः स्वनिष्ठप्रतियोगिताकाभाववद्वृत्तित्वस्य संसर्गत्वेऽस-
म्भवापत्त्याऽवच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वस्य संसर्गत्वम्वाच्य-
न्तथासति गुरुधर्म्मस्यप्रतियोगितानवच्छेदकत्वे तद्रूपवान्रसादित्य-
त्रातिव्याप्तिः तद्रूपत्वावच्छिन्नसम्बन्धित्वाभावप्रतियोगितावच्छेदक-

त्वस्य लाघवेन तद्व्यक्तित्व एव कल्पनीयतयोक्तावच्छिन्नाभाववद्वृत्तित्वस्य तद्रूपत्वावच्छिन्नसम्बन्धिव्यधिकरणत्वेन तदभावस्य हेतुतावच्छेदकावच्छिन्नसम्बन्धित्वे सत्त्वात् उक्तसम्बन्धिताव्यक्त्यभावनिवेशे वह्निमान्धूमादित्यत्राव्याप्तिः उक्तसम्बन्धितात्वंयद्धर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकं तद्रूपावच्छिन्नाभाववत्त्वविवक्षणे तद्रूपावच्छिन्नसम्बन्धितात्वस्य गौरवेण रूपत्वावच्छिन्नसम्बन्धितात्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वेन तद्रूपावच्छिन्नाभाववत्त्वस्य हेतौ सत्त्वेनातिव्याप्तिप्रसङ्गः यद्रूपावच्छिन्नाभावकूटवत्त्वविवक्षा च वह्निमान्धूमादित्यादावव्याप्त्यैवानुपादेया तद्रूपावच्छिन्नाभावकूटान्तर्गतस्य तद्व्यक्त्यभावस्य धूमे विरहात् एवं वाच्यं ज्ञेयत्वादित्यादावपि साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसम्बन्धित्वाभावप्रतियोगितावच्छेदकत्वस्य सम्बन्धितात्व एव लाघवेन कल्पनीयतया तादृशसम्बन्धितात्वावच्छिन्नाभावाप्रसिद्ध्याऽव्याप्तिप्रसङ्गः यदिगुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वमङ्गीक्रियते तदैतस्य लक्षणान्तरत्वमेवावसेयमितिध्येयम् ॥

अथनिरूप्यानिरूपकभावापन्नविषयतात्मकसाध्याभाववद्वृत्तित्वप्रकारतानिरूपितविशेष्यत्वाभावः प्रमीयविशेष्यताप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकोव्याप्तिरस्त्विति चेन्न यत्र व्यभिचारिणि साध्याभाववद्वृत्तित्वस्य न प्रमा तत्रातिव्याप्त्यापत्तेःनचेश्वरस्यैवप्रमासम्भवः विशकलितपदार्थावगाहित्वेनैव सर्व्वविषयकत्वोपपत्तौ विशिष्टविषयकत्वे मानाभावात् एवं वृत्त्यनियामकसम्बन्धस्य गुरुधर्म्मस्य च प्रतियोगितानवच्छेदकत्वे धीः द्रव्यत्वात्प्रमेयधूमवान्वह्नेरित्यादावतिव्याप्त्यापत्तेरित्यलम्